मुखको सुगंधित करनेवाले ताम्बूल आदिकी गंधके नाम २--आमोदिन् १ मुखवासन २॥ ११ ॥

पूतिगन्धिस्तु दुर्गन्धो—

दुर्गन्धके नाम २--पूतिगन्धि १ दुर्गन्ध २ ॥

-विस्रं स्यादामगन्धि यत् ।

कच्चे मांसादिके गन्धका नाम १--विस्र १ ॥

शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डराः ॥ १२ ॥ अवदातः सितोगौरो वलक्षो धवलोऽर्जुनः ।

उज्ज्वलके नाम १३--शुक्ल १ शुभ्र २ शुचि ३ श्वेत ४ विशद ५ श्येत ६ पांडर ७ ॥ १२ ॥ अवदात ८ सित ९ गौर १० वलक्ष ११ धवल १२ अर्जुन १३ ॥

हरिणः पाण्डुरः पाण्डु-

कुछ पीलापन मिले हुए सफेदवर्णके नाम ३--हरिण १ पांडुर २ पांडु ३ ।

रीषत्पाण्डुस्तु धूसरः ॥ १३ ॥

किंचित् उज्ज्वलका नाम १--धूसर १ ॥ १६ ॥

कृष्णे नीलासितश्यामकालश्यामलमेचकाः ।

काले वर्णके नाम ७--कृष्ण १ नील २ असित ३ श्याम ४ काल ५ श्यामल ६ मेचक ७ ॥

पीतो गौरो हरिद्राभः—

पीले वर्णके नाम ३--पीत १ गौर २ हरिद्राभ ३ ॥

—पालाशो हरितो हरित् ॥ १४ ॥

हरे वर्णके नाम--पालाश १ हरित २ हरित् ३ ॥ १४ ॥

रोहितो लोहितो रक्तः—

लालवर्णके नाम ३--रोहित १ लोहित २ रक्त ३ ॥

—शोणः कोकनदच्छविः ।

लाल कमलके समान वर्णके नाम २--शोण १ कोकनदच्छवि २ ॥

अव्यक्तरागस्त्वरुणः—

थोड़े लालके नाम १--अरुण १ ॥

—श्वेतरक्तस्तु पाटलः ॥ १५ ॥

मिले हुए सफेद और लालवर्णका नाम १—पाटल १ ॥ १५ ॥

श्यावः स्यात्कपिशो—

मिले हुए काले और पीले रङ्गके नाम २—श्याव १ कपिश २ ॥

—धूम्रधूमलौ कृष्णलोहिते ।

मिले हुए काले और लालवर्णके नाम ३—धूम्र १ धूमल २ कृष्णलोहित ३ ॥

कडारः कपिलः पिङ्गपिशङ्गौ कद्रुपिङ्गलौ ॥ १६ ॥

वानरकेसे रङ्गके नाम ६—कडार १ कपिल २ पिङ्ग ३ पिशङ्ग ४ कद्रु ५ पिङ्गल ६ ॥ १६ ॥

चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे ।

चित्रवर्णके नाम ६—चित्र १ किर्मीर २ कल्माष ३ शबल ४ एत ५ कर्बुर ६ ॥

गुणे शुक्लादयः पुंसि गुणिलिंगास्तु तद्वति ॥ १७ ॥

गुणवाचक शुक्ल आदि शब्द पुँल्लिंग होते हैं और द्रव्यवाचकशब्द द्रव्यके अनुसार लिंगमें होते हैं ॥ १७ ॥

इति धीवर्गः ॥ १७ ॥

अथ शब्दादिवर्गः ६.

ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती ।

सरस्वतीके नाम ७—ब्राह्मी १ भारती २ भाषा ३ गिर गिरा ४ वाच् ५ वाणी ६ सरस्वती ७ ॥

व्याहार उक्तिर्लपितं भाषितं वचनं वचः ॥ १ ॥

बोलनेके नाम ६—व्याहार १ उक्ति २ लपित ३ भाषित ४ वचन ५ वचस् ६ ॥ १ ॥

अपभ्रंशोऽपशब्दः स्या—

अपभ्रष्ट अर्थात् व्याकरणकी रीतिसे अशुद्ध शब्दका नाम १—अपभ्रंश १ ।

च्छास्त्रे शब्दस्तु वाचकः ।

व्याकरणशास्त्रानुसार शुद्ध शब्दका नाम १—शब्द १ ॥

तिङ्सुबन्तचयो वाक्यं क्रिया वा कारकान्विता ॥ २ ॥

तिङन्तसुबन्तके समूह और कारकयुक्त क्रिया का नाम १—वाक्य १ ॥२॥

श्रुतिः स्त्री वेद आम्नायस्त्रयी--

वेदके नाम ४—श्रुति १ वेद २ आम्नाय ३ त्रयी ४ ॥

--धर्मस्तु तद्विधिः ।

वेदमें कही हुई संध्या तर्पण आदि विधिका नाम १—धर्म १ ॥

स्त्रियामृक्सामयजुषी--

वेदोंके नाम ३—ऋच् १ यजुष् २ सामन् ३ ॥

-इति वेदास्त्रयस्त्रयी ॥ ३ ॥

इन्हीं तीनों वेदोंका इकट्ठा नाम १—त्रयी १ ॥ ३ ॥

शिक्षेत्यादिश्रुतेरङ्ग--

वेदके छः अङ्गोंके नाम ६-शिक्षा १ कल्प २ व्याकरण ३ निरुक्त ४ ज्योतिष ५ छन्दस् ६ ॥

मोंकारप्रणवौ समौ ।

ओंकारके नाम २-ओंकार १ प्रणव २ ॥

इतिहासः पुरावृत--

इतिहासके नाम २-इतिहास १ पुरावृत्त २ ॥

मुदात्ताद्यास्त्रयः स्वराः ॥ ४ ॥

उदात्त, अनुदात्त, स्वरितका नाम १--स्वर १ ॥ ४ ॥

आन्वीक्षिकी दण्डनीतिस्तर्कविद्यार्थशास्त्रयोः ।

तर्कविद्याका नाम १--आन्वीक्षिकी १ अर्थशास्त्रका नाम १--दंडनीति १ ॥

आख्यायिकोपलब्धार्था--

जिसका अर्थ जान लिया हो उस कथाके नाम २-आख्यायिका १ उपलब्धार्था २ ॥

पुराणं पञ्चलक्षणम्॥ ५ ॥

पुराणोंके नाम २-पुराण १ पञ्चलक्षण २ ॥ ५ ॥

प्रबंधकल्पना कथा--

कल्पनाकी हुई कादम्बरी आदि कथाके नाम २-प्रबन्धकल्पना १ कथा २ ॥

प्रवह्लिका प्रहेलिका--

जिसके सुननेसे मतलब जाना जाय और विचार करनेसे दूसरा मतलब निकले उस (कहानी) के नाम २--प्रवह्लिका १ प्रहेलिका २

स्मृतिस्तु धर्मसंहिता-

धर्म जाननेको रचना किये हुए श्लोकोंके समूह के नाम २--स्मृति १ धर्मसंहिता २ ॥

--समाहृतिस्तु संग्रहः ॥ ६ ॥

संग्रहके नाम २--समाहृति १ संग्रह २ ॥ ३ ॥

समस्या तु समासार्था-

जिसमें कुछ अर्थ पूरा किया जाय उसके नाम २--समस्या १ समासार्था २ ॥

--किंवदन्ती जनश्रुतिः ।

लोकप्रवाद अर्थात् दुर्यशके नाम २--किंवदन्ती १ जनश्रुति ॥ २ ॥

वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्या--

वार्ताके नाम ४--वार्त्ता १ प्रवृत्ति २ वृत्तान्त ३ उदन्त ४ ॥

दृथाह्वयः ॥ ७ ॥ आख्याह्वे अभिधानं च नामधेयं च नाम च ।

नामके नाम ६--आह्वय १ ॥ ७ ॥ आख्या २ आह्वा ३ अभिधान ४ नामधेय ५ नामन् ६ ॥

हूतिराकारणाह्वानं-

पुकारनेके नाम ३--हूति १ आकारणा २ आह्वान ३ ॥

--संहूतिर्बहुभिः कृता ॥ ८ ॥

बहुत जनोंकरके पुकारनेका नाम १--संहूति १ ॥ ८ ॥

विवादो व्यवहारः स्या--

विवादके नाम २--विवाद १ व्यवहार २ ॥

--दुपन्यासस्तु वाङ्मुखम् ।

वार्ताका प्रारम्भ करनेके नाम २--उपन्यास १ वाङ्मुख २ ॥

उपोद्घात उदाहारः--

जो बात आगे कही जाय उसके उपयोगी बातके नाम २--उपोद्घात १ उदाहार २ ॥

--शपनं शपथः पुमान् ॥ ९ ॥

सौगन्ध खानेके नाम २--शपन १ शपथ २ ॥ ९ ॥

प्रश्नोऽनुयोगः पृच्छा च--

प्रश्नके नाम ३--प्रश्न १ अनुयोग २ पृच्छा ३॥

--प्रतिवाक्योत्तरे समे ।

उत्तरके नाम २--प्रतिवाक्य १ उत्तर २ ॥

मिथ्याभियोगोऽभ्याख्यान--

झूठे दोष लगानेके नाम २—मिथ्याभियोग १ अभ्याख्यान २ ॥

मथ मिथ्याभिसंशनम् ॥ १० ॥ अभिशापः—

मदिरादिपान आदिका झूठा दोष लगानेके नाम २—मिथ्याभिशंसन १ ॥ १० ॥ अभिशाप२

प्रणादस्तु शब्दः स्यादनुरागजः।

अनुरागज शब्दका नाम १—प्रणाद १ ॥

यशः कीर्तिः समज्ञा च—

कीर्तिके नाम ३—यशस् १ कीर्ति २ समज्ञा ३

—स्तवः स्तोत्रं स्तुतिर्नुतिः ॥ ११ ॥

स्तुतिके नाम ४—स्तव १ स्तोत्र २ स्तुति ३ नुति ४ ॥ ११ ॥

आम्रेडितं द्विस्त्रिरुक्त—

दोतीनबार कहनेका नाम १--आम्रेडित १।

—मुच्चैर्घुष्टं तु घोषणा।

जोरसे बोलनेके नाम२--उच्चैर्घुष्ट १ घोषणा २

काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेः ॥ १२ ॥

शोकभयकामादियुक्त वचनका नाम १--काकु ॥ १२ ॥

अवर्णाक्षेपनिर्वादपरीवादापवादवत्।
उपक्रोशो जुगुप्सा च कुत्सा निन्दा च गर्हणे ॥ १३ ॥

निन्दाके नाम १०—अवर्ण १ आक्षेप २ निर्वाद ३ परीवाद-- (परिवाद) ४ अपवाद ५ उपक्रोश ६ जुगुप्सा ७ कुत्सा ८ निन्दा ९ गर्हण १०॥१३॥

पारुष्यमतिवादः स्या—

कठोर भाषणके नाम २--पारुष्य १ अतिवाद २ ॥

—भर्त्सनं त्वपकारगीः।

ललकारनेका नाम १--भर्त्सन १ ॥

यः सनिन्द उपालम्भस्तत्र स्यात्परिभाषणम् ॥ ४१ ॥

खिजानेका नाम १--परिभाषण १ ॥ १४ ॥

तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रति।

परस्त्री या पुरुषसे मैथुनार्थ वार्त्ता करनेका नाम १-आक्षारणा (आक्षारण १) ॥ वाचिक २ ॥

स्यादाभाषणमालापः—

सम्बोधनपूर्वक वार्त्ता करनेका नाम २--आभाषण १ आलाप २ ॥

प्रलापोऽनर्थकं वचः ॥ १५ ॥

अनर्थ वचनका नाम १--प्रलाप १ ॥ १५ ॥

अनुलापो मुहुर्भाषा—

बारम्बार भाषणके नाम २--अनुलाप १ मुहुर्भाषा ॥ २ ॥

—विलापः परिदेवनम्।

रोनेके नाम २--विलाप १ परिदेवन २ ॥

विप्रलापो विरोधोक्तिः—

परस्पर विरुद्ध भाषणके नाम २--विप्रलाप १ विरोधोक्ति ॥ २ ॥

—संलापो भाषणं मिथः ॥ १६ ॥

परस्पर योग्यभाषणका नाम १--संलाप १ ॥ १६ ॥

सुप्रलापः सुवचन—

सुन्दर वचनके नाम २--सुप्रलाप १सुवचन॥२॥

—मपलापस्तु निह्नवः।

मुकर जानेके नाम २--अपलाप १ निह्नव २ ॥

संदेशवाग्वाचिकं स्या-

संदेशके नाम २--सन्देशवाच् १ वाचिक २ ॥

-द्वाग्भेदास्तु त्रिषूत्तरे ॥ १७ ॥

रुशती शब्दसे लेकर सम्यक्शब्दपर्यंत जो शब्द हैं वे तीनों लिंगोंमें होते हैं ॥ १७ ॥

रुशती वागकल्याणी—

अमंगल वाक्यका नाम १--रुशती १ ॥

स्यात्कल्या तु शुभात्मिका ।

शुभवाणीका नाम १--कल्या १ ॥

अत्यर्थमधुरं सान्त्वं—

अति मिष्टवचनका नाम १--सान्त्व १॥

-संगतं हृदयंगमम् ॥ १८ ॥

सम्बद्ध अर्थात् योग्य वचनके नाम २--संगत १ हृदयंगम २ ॥ १८ ॥

निष्ठुरं परुषं—

कठोरवचनके नाम २--निष्ठुर १ परुष २ ॥

-ग्राम्यमश्लीलं-

माँड़ आदिके वचनोंके नाम २-- ग्राम्य १ अश्लील २ ॥

सूनृतं प्रिये । सत्ये-

प्रिय और सत्यवचनका नाम १ सूनृत १॥

-ऽथ संकुलक्लिष्टे परस्परपराहते॥१९॥

पूर्वापर विरुद्ध वचनके नाम ३--संकुल १ क्लिष्ट २ परस्परपराहत ३॥१९॥

लुप्तवर्णपदं ग्रस्तं-

अधकहे वचनके नाम २--लुप्तवर्णपद १ ग्रस्त २ ॥

निरस्तं त्वरितोदितम् ।

जलदी कहे हुए शब्दके नाम २--निरस्त १ त्वरितोदित २ ॥

अम्बूकृतं सनिष्ठीव—

थूकसहित बोलनेके नाम २--अम्बूकृत १ सनिष्ठीव २ ॥

—अबद्धं स्यादनर्थकम् ॥ २० ॥

अर्थन्यूनवचनके नाम २--अबद्ध १ अनर्थक २ ॥ २० ॥

अनक्षरमवाच्यं स्या--

अकथनयोग्य निन्दायुक्त वचनके नाम २--अनक्षर १ अवाच्य २ ॥

-दाहतं तु मृषार्थकम् ।

झुठाईका नाम १--आहत १ ॥

"सोल्लुण्ठनं तु सोत्प्रासं--

हास्यसहित वचनके नाम २--सोल्लुण्ठन १ सोत्प्रास २ ॥

—भणितं रतिकूजितम्" ।

मैथुनके शब्दके नाम २--भणित १ रतिकूजित २ ॥

अथ म्लिष्टमविस्पष्टं--

अप्रतीकके नाम २--म्लिष्ट १ अविस्पष्ट २ ॥

--वितथं त्वनृतं वचः ॥ २१ ॥

झूठके नाम २--वितथ १ अनृत २॥२१॥

सत्यं तथ्यमृतं सम्य-

सत्यके नाम ४--सत्य १ तथ्य २ ऋत ३ सम्यच् ४ ॥

--गमुनि त्रिषु तद्वति ।

सत्य आदि शब्द द्रव्यवाचक हों तो तीनों लिंगोंमें होते हैं ॥

शब्दे निनादनिनदध्वनिध्वानरवस्वनाः ॥ २२ ॥ स्वाननिर्घोषनिर्ह्रादनादनिस्वाननिस्वनाः । आरवारावसंरावविरावा-

शब्दके नाम १७--शब्द १ निनाद २ निनद ३ ध्वनि ४ ध्वान ५ रव ६ स्वन ७ ॥ २२ ॥ स्वान ८ निर्घोष ९ निर्ह्राद १० नाद ११ निस्वान १२ निस्वन १३ आरव १४ आराव १५ संराव १६ विराव १७ ॥

—अथ मर्मरः ॥ २३ ॥ स्वनिते वस्त्रपर्णानां—

वस्त्र और पत्तोंके शब्दका नाम १--मर्मर १ ॥ ३३ ॥

भूषणानां च शिञ्जितम् ।

गहनेके खनखनाहटका नाम १-- शिञ्जित १।

[illegible] निक्वणः क्वाणः क्वणः क्वण नमित्यपि ॥ २४ ॥

वीणादि शब्दोंके नाम ५--निक्वाण १ निक्वण २ क्वाण ३ क्वण ४ क्वणन ५ ॥ २४ ॥

वीणायाः क्वणिते प्रादैः प्रक्वाणप्रक्वणादयः ।

केवल वीणाके बाजोंके नाम ३--प्रक्वाण १ प्रक्वण २ उपक्वणन आदि ३ ॥

कोलाहलः कलकलः--

कोलाहलके नाम २--कोलाहल १ कलकल २ ॥

--स्तिरश्चां वाशितं रुतम् ॥ २५ ॥

पक्षियोंके शब्दके नाम २--वाशित १ रुत २ ॥ २५ ॥

स्त्री प्रतिश्रुत्प्रतिध्वाने--

आवाजकी आवाज अर्थात् गूँजनेकानाम २--प्रतिश्रुत् १ प्रतिध्वान २ ॥

--गीतं गानमिमे समे ।

गानेके नाम २--गीत १ गान २ ॥

इति शब्दादिवर्गः ६ ॥

अथ नाट्यवर्गः ७.

×निषादर्षभगान्धारषड्जमध्यमधैवताः ॥ पञ्चमश्चेत्यमी सप्त तन्त्रीकण्ठोत्थिताः स्वराः ॥ १ ॥

वीणासे वा कंठसे उत्पन्न होनेवाले स्वरोंके नाम ७--निषाद १ ऋषभ २ गान्धार ३ षड्ज ४ मध्यम ५ धैवत ६ पञ्चम ७ ॥ १ ॥

काकली तु कले सूक्ष्मे -

×" षड्जं रौति मयूरस्तु गावो नर्दन्ति चर्षभम् । अजाविकौ च गांधारं क्रौञ्चो नदति मध्यमम् ॥१॥ पुष्पसाधारणे काले कोकिलो रौति पञ्चमम् । अश्वस्तु धैवतं रौति निषादं रौति कुञ्जरः ॥२॥" अर्थात् मोर षड्ज शब्दको बोलता है । बैल ऋषभ शब्दको, भेड बकरी गान्धार स्वरको, क्रौञ्च पक्षी मध्यम स्वरको, घोड़ा धैवत स्वरको, कोकिल बसन्त कालमें पञ्चम स्वरको और हस्ती निषाद स्वरको बोलता है ।

सूक्ष्मशब्दका नाम १--काकली १ ॥

—ध्वनौ तु मधुरास्फुटे । कलो-

मीठी और अस्फुट आवाजका नाम १--कल

मन्द्रस्तु गम्भीरे—

गम्भीर शब्दका नाम १--मन्द्र १ ॥

—तारोऽत्युच्चै—

अत्युच्च शब्दका नाम १--तार १ ॥

-त्रयस्त्रिषु ॥ २ ॥

कल आदि तीन शब्द तीनों लिंगोंमें होते हैं॥२॥

समन्वितलयस्वैकतालो-

वाद्यगानादिके एकसङ्ग तालस्वरका नाम १-एकताल १ ॥

--वीणा तु वल्लकी । विपञ्ची--

वीणाके नाम ३--वीणा १ वल्लकी २ विपञ्ची ३॥

--सा तु तन्त्रीभिः सप्तभिः परिवादिनी ॥ ३ ॥

सात तारोंसे बोलनेवाली वीणाका नाम १-परिवादिनी १ ॥ ३ ॥

ततं वीणादिकं वाद्य--

वीणादिक बाजेका नाम १--तत १ ॥

मानद्धं मुरजादिकम् ।

मृदंगआदि बाजेका नाम--१--आनद्ध १ ॥

वंशादिकं तु सुषिरं--

वंशी आदि बाजेका नाम १--सुषिर १॥

कांस्यतालादिकं घनम् ॥ ४ ॥

झांझ मंजीरा आदि बाजेका नाम १--घन१॥४॥

चतुर्विधमिदं वाद्यं वादित्रातोद्यनामकम् ।

तत आदि चारों बाजोंका इकट्ठा नाम ३--वाद्य १ वादित्र २ आतोद्य ३ ॥

मृदङ्गो मुरजो-

मृदङ्गके नाम २-- मृदङ्ग १ मुरज २

--भेदास्त्वङ्क्याऽलिङ्ग्योर्ध्वकाख्य ः॥५॥

मृदङ्गके भेद ३--अङ्क्य १ आलिङ्ग्य २ ऊर्ध्वक ५ ॥

स्याद्यशःपटहो ढक्का--

नगाडेके नाम २--यशःपटह १ ढक्का २ ॥

भेर्यामानकदुन्दुभी ।

धोंसा नफीरी आदिके नाम ३--भेरी १ आनक २ दुन्दुभि ३ ॥

आनकः पटहोऽस्त्री स्यात्--

ढोलके नाम २--आनक १ पटह २ ॥

- कोणो वीणादिवादनम् ॥ ६॥

जिससे वीणादि बजाते हैं उस नक्खी आदिका नाम १--कोण १ ॥ ६ ॥

वीणादण्डः प्रवालः स्या--

वीणाकी दण्डीका नाम १--प्रवाल १ ।

- त्ककुभस्तु प्रसेवकः ।

वीणाके नीचे जो गोल गोल चर्मसे मढ़ा हुआ होता है उसके नाम २--ककुभ १ प्रसेवक २ ॥

कोलम्बकस्तु कायोऽस्या--

वीणाके सर्वाङ्गका नाम १--कोलम्बक १

--उपनाहो निबन्धनम् ॥ ७ ॥

वीणामें जहां तार बांधे जाते हैं उसके नाम २--उपनाह १ निबन्धन २ ॥ ७ ॥

वाद्यप्रभेदा डमरुमड्डुडिण्डिमझर्झराः। मर्दलः पणवोऽन्ये च-

डमरुका नाम १—डमरु १ ॥ बड़े डमरुका नाम १--मड्डु १ ॥ डिंडिम का नाम १--डिंडिम १ ॥ झांझका नाम १--झर्झर १ ॥ तथा मर्दल, पणव आदि और भी बाजे हैं ॥

--नर्तकीलास्यिके समे ॥ ८ ॥

नाचनेवालीके नाम २--नर्तकी १ लास्यिका २ ॥ ८ ॥

विलम्बितं द्रुतं मध्यं तत्त्वमोघो घनं क्रमात् ।

धीरे धीरे नाचका नाम १--तत्त्व १ ॥ शीघ्र नाचका नाम १--ओघ १ ॥ मध्यम नाचका नाम १--घन १

तालः कालक्रियामानं--

समय और क्रियाके प्रमाणका नाम १--ताल १ ॥

--लयः साम्य--

बाजा और नाचका एक संग ताल छूटनेका नाम १—लय १ ॥

--मथास्त्रियाम् ॥ ९ ॥

इसके आगे कहे ये शब्द स्त्रीलिङ्गवाची नहीं हैं अर्थात् पुलिंगनपुंसकलिङ्गवाची होते हैं ॥ ९ ॥

ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम् ।

नाचके नाम ६—तांडव १ नटन २ नाट्य ३ लास्य ४ नृत्य ५ नर्त्तन ६ ॥

तौर्यत्रिकं नृत्यगीतवाद्यं नाट्यमिदं त्रयम् ॥ १० ॥

नाच गीत बाजा इन तीनके इकट्ठे नाम २—तौर्यत्रिक १ नाट्य २ ॥ १० ॥

भ्रकुसश्च भ्रुकुंसश्च भ्रकुंसश्चेति नर्तके स्त्रीवेषधारी पुरुषो--

स्त्रीवेशधारी नाचनेवाले पुरुषके नाम ६—भ्रकुस भ्रुकुस २ भ्रूकुस ३ ॥

--नाट्योक्तौ गणिकाज्जुका ॥ ११ ॥

केवल नाटकमें नाचने गानेवाली वेश्याका नाम १—अज्जुका १ ॥ ११ ॥

भगिनीपतिरावुत्तो--

बहनोईका नाम १—आवुत्त १ ॥

--भावा विद्वा--

विद्वान्का नाम १—भाव १ ॥

--नथावुकः । जनको--

पिताका नाम १—आवुक १ ॥

युवराजस्तु कुमारो भर्तृदारकः ॥१२॥

युवराजके नाम २—कुमार १ भर्तृदारक २ ॥ १२ ॥

राजा भट्टारको देव--

राजाके नाम २—भट्टारक १ देव २ ॥

--स्तत्सुता भर्तृदारिका ।

राजकन्याका नाम १—भर्तृदारिका १ ॥

देवी कृताभिषेकाया--

अभिषेक की हुई रानीका नाम १—देवी १ ॥

मितरासु तु भट्टिनी ॥ १३ ॥

अन्य राजस्त्रियोंका नाम १—भट्टिनी १॥१३॥

अब्रह्मण्यमवध्योक्तौ -

अवध्य वचनका नाम १—अब्रह्मण्य १ ॥

-राजश्यालस्तु राष्ट्रियः ।

राजाके सालेका नाम—१ राष्ट्रिय १ ॥

अम्बा माता—

माताके नाम २—अम्बा १ मातृ २ ॥

ऽथ बाला स्याद्वासू—

कुमारीके नाम २—बाला १ वासू २ ॥

--रार्यस्तु मारिषः ॥ १४ ॥

श्रेष्ठके नाम २—आर्य १ मारिष २ ॥ १४ ॥

अत्तिकाभगिनी ज्येष्ठा--

जेठी बहनका नाम १—अत्तिका १ ॥

निष्ठानिर्वहणे समे ।

नाटककी संधियोंके नाम २—निष्ठा । १ निर्वहण २ ॥

हण्डे हञ्जे हलाह्वाने नीचां चेटीं सखीं प्रति ॥ १५ ॥

नीच स्त्रीके पुकारनेमें हण्डे १ ॥ चेटीके पुकारनेमें—हंजे १ ॥ सखीके पुकारनेमें—हला १ ॥ १५ ॥

अङ्गहारोऽङ्गविक्षेपो--

लचकनेके नाम २—अङ्गहार १ अङ्गविक्षेप २॥

--व्यञ्जकाभिनयौ समौ ।

भाव बतानेके नाम २—व्यञ्जक १ अभिनय २ ॥

निर्वृत्ते त्वंगसत्त्वाभ्यां द्वे त्रिष्वांगिक-सात्त्विके ॥ १६ ॥

भौंह मटकानेका नाम १—आंगिक १ अन्तःकरणके भावका नाम १—सात्त्विक १ ॥ १६ ॥

शृङ्गारवीरकरुणाद्भुतहास्यभयानका बीभत्सरौद्रौ च रसाः-

साहित्यिक रसोंके नाम १०—शृङ्गार १ वीर २ करुण ३ अद्भुत ४ हास्य ५ भयानक ६ बीभत्स ७ रौद्र ८ शांति ९ (वात्सल्य १०)

शृङ्गारः शुचिरुज्ज्वलः ॥ १७ ॥

शृङ्गारके नाम ३—शृङ्गार १ शुचि २ उज्ज्वल ३ ॥ १७ ॥

उत्साहवर्धनो वीरः -

वीररसके नाम २—उत्साहवर्धन १ वीर २ ॥

--कारुण्यं करुणा घृणा । कृपादयानुकम्पा स्यादनुक्रोशो--

करुणा रसके नाम ७—कारुण्य १ करुणा २ घृणा ३ कृपा ४ दया ५ अनुकंपा ६ अनुक्रोश ७ ॥

-ऽप्यथो हसः ॥ १८ ॥ हासोहास्यं च-

हास्यरसके नाम ३—हस १ ॥ १८ ॥ हास २ हास्य ३ ॥

—बीभत्सं विकृतं त्रिष्विदं द्वयम् ।

बीभत्सरसके नाम २—बीभत्स १ विकृत २ ॥

विस्मयोऽद्भुतमाश्चर्यं चित्र-

अद्भुतरसके नाम ४—अद्भुत १ आश्चर्य २ विस्मय ३ चित्र ४ ॥

मप्यथ भैरवम् ॥ १९ ॥

दारुणं भीषणं भीष्मं घोरं भीमं भयानकम् । भयङ्करं प्रतिभय-

भयानक रसके नाम ९—भैरव १ ॥ १९ ॥ दारुण २ भीषण ३ भीष्म ४ घोर ५ भीम ६ भयानक ७ भयंकर ८ प्रतिभय ९ ॥

-रौद्रं तूग्र-

रौद्ररसके नाम २-रौद्र १ उग्र ३॥

-ममीत्रिषु ॥ २० ॥ चतुर्दश-

अद्भुतादि चौदह शब्द द्रव्यवाचक हों तो विशेष्यनिघ्नलिङ्ग जानना ॥ २० ॥

-दरत्रासो भीतिर्भीः साध्वसं भयम् ।

भयके नाम ६-दर १ त्रास २ भीति ३ भी ४ साध्वस ५ भय ६ ॥

विकारो मानसो भावो-

मनके विकारका नाम १-भाव १ ॥

-ऽनुभावो भावबोधकः ॥ २१ ॥

भावप्रकाशकका नाम १-अनुभाव १ ॥ २१ ॥

गर्वोऽभिमानोऽहंकारो-

अहंकारके नाम ३-गर्व १ अभिमान २ अहंकार ३ ॥

-मानश्चित्तसमुन्नतिः ।

बड़प्पनका नाम १-मान १ ॥

अनादरः परिभवः परीभावस्तिरस्क्रिया ॥ २२ ॥ रीढावमाननावज्ञावहेलनमसूक्षणम् ।

निरादरके नाम ९-अनादर १ परिभव २ परीभाव ३ तिरस्क्रिया ४ ॥ २२ ॥ रीढ़ा ५ अवमानना ६ अवज्ञा ७ अवहेलन ८ असूक्षण ९।

मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा-

लज्जाके नाम ५-मन्दाक्ष १ ह्री २ त्रपा ३ व्रीडा ४ लज्जा ५ ॥

-सापत्रपान्यतः ॥ २३ ॥

दूसरेसे लजानेका नाम १-अपत्रपा १ ॥ २३ ॥

क्षान्तिस्तितिक्षा-

क्षमाके नाम २-क्षान्ति १ तितिक्षा २ ॥

-ऽभिध्या तु परस्य विषयेस्पृहा ।

परधन लेनेकी इच्छाका नाम १-अभिध्या १ ॥

अक्षान्तिरीर्ष्या-

ईर्ष्याके नाम २-अक्षान्ति १ ईर्ष्या २ ॥

-ऽसूया तु दोषारोपो गुणेष्वपि ॥२४॥

पराये गुणोंमें दोष प्रसिद्ध करनेका नाम १-असूया १ ॥ २४ ॥

वैरं विरोधो विद्वेषो-

वैरके नाम ३-वैर १ विरोध २ विद्वेष ३ ॥

मन्युशोकौ तु शुक् स्त्रियाम् ।

शोकके नाम ३-मन्यु १ शोक २ शुच् ३ ॥

पश्चात्तापोऽनुतापश्च विप्रतीसार इत्यपि ॥ २५ ॥

पछतानेके नाम ३-पश्चात्ताप १ अनुताप २ विप्रतीसार ३ ॥ २५ ॥

कोपक्रोधामर्षरोषप्रतिघा रुष्क्रुधौ स्त्रियौ ।

क्रोधके नाम ७-कोप १ क्रोध २ अमर्ष ३ रोष ४ प्रतिघा ५ रुष् ६ क्रुध् ७

शुचौ तु चरिते शील-

शुद्ध आचरणका नाम १-शील १ ॥

-मुन्मादश्चित्तविभ्रमः ॥ २६ ॥

सिड़ीपनके नाम २-उन्माद १ चित्तविभ्रम २ ॥ २६ ॥

प्रेमाना प्रियता हार्दं प्रेम स्नेहो-

प्रेमके नाम ५-प्रेमन् १ प्रियता २ हार्द ३ प्रेमन् ४ स्नेह ५ ॥

-ऽथदोहदम् । इच्छा कांक्षा स्पृहेहा तृड्वाञ्छा लिप्सा मनोरथः २७ कामोऽभिलाषस्तर्षश्च-

इच्छाके नाम १२-दोहद १ इच्छा २ कांक्षा ३ स्पृहा ४ ईहा ५ तृष् ६ वांछा ७ लिप्सा ८ मनोरथ ९ ॥ २७ ॥ काम १० अभिलाष ११ तर्ष १२ ॥

-सोऽस्यर्थं लालसा द्वयोः ।

बड़ी इच्छाका नाम १-लालसा १ ।

उपाधिर्धर्मचिन्ता-

धर्मचिन्ताके नाम २-उपाधि १ धर्मचिन्ता २ ।

पुंस्याधिर्मानसी व्यथा ॥ २८ ॥

॥ की पीड़ाके नाम २—आधि १ मानसी व्यथा २ ॥ २८ ॥

स्याच्चिन्तास्मृतिराध्यान-

स्मरणके नाम ३-चिंता १ स्मृति २ आध्यान ३ ॥

-मुत्कण्ठोत्कलिके समे ।

कामादिसे उत्पन्न स्मृतिके नाम २—उत्कंठा १ उत्कलिका २ ॥

उत्साहोऽव्यवसायः स्यात-

उत्साहके नाम २—उत्साह १ अध्यवसाय २॥

-स वीर्यमतिशक्तिभाक् ॥ २९ ॥

असाध्य साधनमें उत्साहका नाम-१ वीर्य १ ॥ १९ ॥

कपटोऽस्त्री व्याजदंभोपधयश्छद्मकैतवे । कुसृतिर्निकृतिः शाठ्यं-

कपटके नाम ९-कपट १ व्याज २ दम्भ ३ उपधि ४ छद्मन् ५ कैतव ६ कुसृति ७ निकृति ८ शाठ्य ९ ॥ २९ ॥

-प्रमादोऽनवधानता ॥ ३० ॥

असावधानताके नाम २—प्रमाद १ अनवधानता २ ॥ ३० ॥

कौतूहलं कौतुकं च कुतुकं च कुतूहलम् ।

तमासेके नाम ४-कौतूहल १ कौतुक २ कुतुक ३ कुतूहल ४ ॥

स्त्रीणां विलासविब्बोकविभ्रमा ललितं तथा ॥ ३१ ॥ हेलालीलेत्यमी हावाः क्रियाः शृङ्गारभावजाः ।

शृङ्गार और भावसे उत्पन्न होनेवाले स्त्रियोंके विलासके नाम ६--विलास १ विब्बोक २ विभ्रम ३ ललित ४ ॥ ३१ ॥ हेला ५ लीला ६ ॥

द्रवकेलिपरीहासाः क्रीडा खेला च नर्म च ॥ ३२ ॥

हँसी करनेके नाम ६--द्रव्य १ केलि २ परीहास ३ क्रीडा ४ खेला ५ नर्मन् ६ ॥ ३२ ॥

व्याजोऽपदेशो लक्ष्यं च-

बहाना करनेके नाम ३--व्याज १ अपदेश २ लक्ष्य ३ ॥

-क्रीडः खेला च कुर्दनम् ।

बालकोंके खेलके नाम ३--क्रीडा १ खेला २ कूर्दन ३ ॥

घर्मो निदाघः स्वेदः स्यात्-

गर्मीके नाम ३-घर्म १ निदाघ २ स्वेद ३ ॥

-प्रलयो नष्टचेष्टता ॥ ३३ ॥

बेहोशीके नाम २-प्रलय १ नष्टचेष्टता ॥२॥३३॥

अवहित्थाऽऽकारगुप्तिः-

शोकमें सूरत छिपानेके नाम २-अवहित्था १ आकारगुप्ति २ ॥

-समौ संवेगसंभ्रमौ ।

हर्ष आदिके कारण शीघ्र कार्य करनेके नाम २-संवेग १ संभ्रम २ ॥

स्यादाच्छुरितकं हासः सोत्प्रासः-

किसीको खिजानेके लिये हँसी करनेके नाम १-आच्छुरितक १ ॥

-स मनाक् स्मितम् ॥ ३४ ॥

मुस्कुरानेके नाम १—स्मित १ ॥ ३४ ॥

मध्यमः स्याद्विहसितं-

मध्यम हास्यका नाम १—विहसित १ ॥

-रोमाञ्चो रोमहर्षणम् ।

रोमोंके खड़े होनेके नाम २—रोमाञ्च १ रोमहर्षण २ ॥

क्रन्दितं रुदितं क्रुष्ट-

रोनेके नाम ३—क्रंदित १ रुदित २ क्रुष्ट ३ ॥

-जृम्भस्तु त्रिषु जृम्भणम् ॥ ३५ ॥

जम्भाई लेनेके नाम २-जृम्भ १ जम्भण २ ॥३५॥

विप्रलम्भो विसंवादो-

स्वीकार करके कार्यको न करनेके नाम २—विप्रलम्भ १ विसंवाद २ ॥

-रिङ्गणं स्खलनं समे।

धर्मसे चलायमान होनेके अथवा बालकोंके घुटओंसे चलनेके नाम २—रिङ्गण १ स्खलन २ ॥

स्यान्निद्रा शयनं स्वापः स्वप्नः संवेश इत्यपि ॥ ३६ ॥

शयन करनेके नाम ५—निद्रा १ शयन २ स्वाप ३ स्वप्न ४ संवेश ५ ॥ ३६ ॥

तन्द्री प्रमीला—

ओंघनेके नाम २—तन्द्री १ प्रमीला २ ॥

-भ्रकुटिर्भ्रुकुटिर्भ्रुकुटिः स्त्रियाम्।

क्रोधसहित भौंह चढ़ानेके नाम ३—भ्रकुटि १ भ्रुकुटि २ भ्रूकुटि ३ ॥

अदृष्टिः स्यादसौम्येऽक्षि-

क्रूरदृष्टिका नाम १—अदृष्टि १ ॥

संसिद्धिप्रकृती त्विमे ॥ ३७ ॥
स्वरूपं च स्वभावश्च निसर्गश्चा-

स्वभावके नाम ५—संसिद्धि १ प्रकृति २ ॥ ३७ ॥ स्वरूप ३ स्वभाव ४ निसर्ग ५

-ऽथ वेपथुः। कम्पो-

कांपनेके नाम २—वेपथु १ कम्प २ ॥

-ऽथ क्षण उद्धर्षो मह उद्धव उत्सवः ॥ ३८ ॥

उत्सवके नाम ५—क्षण १ उद्धर्ष २ मह ३ उद्धव ४ उत्सव ५ ॥ ३५ ॥

इति नाट्यवर्गः ॥ ७ ॥

अथ पातालभोगिवर्गः ८

अधोभुवन पातालं बलिसद्म रसातलम्। नागलोको-

पातालके नाम ५—अधोभुवन १ पाताल २ बलिसद्मन् ३ रसातल ४ नागलोक ५ ॥

-ऽथ कुहरं सुषिरं विवरं बिलम् ॥ १ ॥
छिद्रं निर्व्यथनं रोकं रन्ध्रं श्वभ्रं वपां शुषिः

छेदके नाम ११—कुहर १ सुषिर २ विवर ३ बिल ४ ॥ १ ॥ छिद्र ५ निर्व्यथन ६ रोक ७ रन्ध्र ८ श्वभ्र ९ वपा १० शुषि ११ ॥

गर्तावटौ भुवि श्वभ्रे-

पृथ्वीके गड़हेके नाम २—गर्त १ अवट २ ॥

-सरन्ध्रे सुषिरं त्रिषु ॥ २ ॥

छेदयुक्त वस्तुका नाम १—सुषिर १ ॥ २ ॥

अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः।

अन्धकारके नाम ५—अन्धकार १ ध्वान्त २ तमिस्र ३ तिमिर ४ तमस् ५ ॥

ध्वान्ते गाढेऽन्धतमसं-

अत्यन्त अन्धकारका नाम १—अन्धतमस् १ ॥

-क्षीणेऽवतमसं-

थोड़ी अँधियारीका नाम १—अवतमस् १ ॥

-तमः ॥ ३ ॥ विष्वक्सं तमसं-

सब ओर फैले हुए अन्धकारका नाम १—सन्तमस् १ ॥ ३ ॥

-नागाः काद्रवेया-

फन और पूंछवाले मनुष्याकार सर्पोंके नाम २—नाग १ काद्रवेय २ ॥

-स्तदीश्वरः। शेषोऽनन्तो-

शेषनागके नाम २—शेष १ अनन्त २ ॥

-वासुकिस्तु सर्पराजो-

सर्पराजके नाम २—वासुकि १ सर्पराज २ ॥

-ऽथ गोनसे ॥ १४ ॥ तिलित्सः स्या-

गोके समान नासिकावाले सर्पके नाम २—गोनस् १ ॥ ४ ॥ तिलित्स २ ॥

-दजगरे शयुर्बाहस इत्युभौ।

अजगरके नाम ३—अजगर १ शयु २ बाहस ३ ॥

अलगर्दो जलव्यालः-

पानीके सर्पके नाम—२अलगर्द १ जलव्याल२॥

-समौ राजिलडुण्डुभौ ॥ ५ ॥

द्विमुहा सर्पके नाम २-राजिल १ डुण्डुभ २ ॥ ५ ॥

मालुधानो मातुलाहि-

चीते सर्पके नाम २-मालुधान १ मातुलाहि २॥

निर्मुक्तो मुक्तकंचुकः ।

कचुली छोड़े हुए सब सर्पोंके नाम २—निर्मुक्त १ मुक्तकंचुक २ ॥

सर्पः पृदाकुर्भुजगो भुजङ्गोऽहिर्भुजङ्गमः ॥ ६ ॥ आशीविषो विषधरश्चक्री व्यालः सरीसृपः । कुण्डली गूढपाच्चक्षुःश्रवाः काकोदरः फणी ॥ ७ ॥ दर्वीकरो दीर्घपृष्ठो दन्दशूको बिलेशयः ॥ उरगः पन्नगो भोगी जिह्मगः पवनाशनः ॥८॥

सर्पके नाम २५—सर्प १ पृदाकु २ भुजग ३ भुजंग ४ अहि ५ भुजंगम ६ ॥ ६ ॥ आशीविष ७ विषधर ८ चक्रिन् ९ व्याल १० सरीसृप ११ कुण्डलिन् १२ गूढपाद १३ चक्षुःश्रवस् १४ काकोदर १५ फणिन् १६ ॥ ७ ॥ दर्वीकर १७ दीर्घपृष्ठ १८ दन्दशूक १९ बिलेशय २० उरग २१ पन्नग २२ भोगिन् २३ जिह्मग २४ पवनाशन २५ ॥ ८ ॥

विष्वाहेयं विषास्थ्यादि-

सर्पके विष और हड्डी आदिका नाम १—आहेय १ ॥

-स्फटायां तु फणा द्वयोः ।

सर्पके फनके नाम २-स्फटा १ फणा २ ॥

समौ कंचुकनिर्मोकौ-

कचुलीके नाम २-कचुक १ निर्मोक २ ॥

-क्ष्वेडस्तु गरलं विषम् ॥ ९ ॥

विषके नाम ३—क्ष्वेड १ गरल २ विष ३॥९॥

पुंसि क्लीबे च काकोलकालकूटहलाहलाः । सौराष्ट्रिकः शौक्लिकेयो ब्रह्मपुत्रः प्रदीपनः ॥ १० ॥ दारदो वत्सनाभश्च विषभेदा अमी नव ।

विषके भेद ९-काकोल १ कालकूट २ हलाहल ३ सौराष्ट्रिक ४ शौक्लिकेय ५ ब्रह्मपुत्र ६ प्रदीपन ७ ॥ १० ॥ दारद ८ वत्सनाभ ९ ॥

विषवैद्यो जाङ्गुलिको-

सर्पके विषको दूर करनेकी विद्या जाननेवालेके नाम २—विषवैद्य १ जांगुलिक २ ॥

व्यालग्राह्यहितुण्डिकः ॥ ११ ॥

सर्प पकड़नेवालेके नाम २-व्यालग्राहिन् १ अहितुण्डिक २ ॥ ११ ॥

इति पातालभोगिवर्गः ॥ ८

अथ नरकवर्गः ९.

स्यान्नारकस्तु नरको निरयो दुर्गतिः स्त्रियाम् ।

नरकके नाम ४-नारक १ नरक २ निरय ३ दुर्गति ४ ॥

तद्भेदास्तपनार्चिर्महारौरवरौरवा ॥ १ ॥ संहारः कालसूत्रं चेत्याद्याः-

नरकोंकी जातिके भेद-तपन १ अर्चि २ महारौरव ३ रौरव ४ ॥ १ ॥ संहार ५ कालसूत्र ६ आदि ॥

—सत्त्वास्तु नारकाः । प्रेता—

नरकवासियोंके नाम २-नारक १ प्रेत २ ॥

—वैतरणी सिंधुः—

प्रेतोंकी नदीका नाम १—वैतरणी १ ॥

—स्यादलक्ष्मीस्तु निर्ऋतिः ॥ २ ॥

नरककी अशोभाके नाम २—अलक्ष्मी १ निर्ऋति २ ॥ २ ॥

विष्टिराजूः—

नरकमें जबरदस्ती ढकेलनेके नाम २—विष्टि १ आजू २ ॥

—कारणा तु यातना तीव्रवेदना

नरककी पीडाके नाम ३—कारणा १ यातना २ तीव्रवेदना ३ ॥

पीडा बाधा व्यथा दुःखमामनस्यं प्रसूतिजम् ॥ ३ ॥ स्यात्कष्टं कृच्छ्रमाभीलं—

पीडाके नाम ९—पीडा १ बाधा २ व्यथा ३ दुःख ४ आमनस्य ५ प्रसूतिज ६ ॥ ३ ॥ कष्ट ७ कृच्छ्र ८ आभील ९

—त्रिष्वेषां भेद्यगामि यत् ॥ ४ ॥

इनशब्दोंमें जो द्रव्यवाचक हों वे तीनों लिंगोंमें होते हैं ॥ ४ ॥

इति नरकवर्गः ॥ ९ ॥

अथ वारिवर्गः १०.

समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिः । उदन्वानुदधिः सिन्धुः सरस्वान्सागरोऽर्णवः ॥ १ ॥ रत्नाकरो जलनिधिर्यादःपतिरपांपतिः ।

समुद्रके नाम १५—समुद्र १ अब्धि २ अकूपार ३ पारावार ४ सरित्पति ५ उदन्वत् ६ उदधि ७ सिन्धु ८ सरस्वत् ९ सागर १० अर्णव ११ ॥ १ ॥ रत्नाकर १२ जलनिधि १३ यादःपति १४ अपाम्पति १५ ॥

तस्य प्रभेदाः क्षीरोदो लवणोदस्तथापरे ॥ २ ॥

समुद्रके भेद ७—क्षीरोद १ लवणोद २ (इक्षुरसोद ३ सुरोद ४ दधिमण्डोद ५ स्वादूद ६ घृतोद ७) ॥ २ ॥

आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम् । पयः कीलाममृतं जीवनं भुवनं वनम् ॥ ३ ॥ कबंधमुदकं पाथः पुष्करं सर्वतोमुखम् । अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बु शम्बरम् ॥ ४ ॥ मेघपुष्पं घनरस—

जलके नाम १७—अप् १ वार २ वारि ३ सलिल ४ कमल ५ जल ६ पयस् ७ कीलाल ८ अमृत ९ जीवन १० भुवन ११ वन १२ ॥ ३ ॥ कबन्ध १३ उदक १४ पाथस् १५ पुष्कर १६ सर्वतोमुख १७ अम्भस् १८ अर्णस् १९ तोय २० पानीय २१ नीर २२ क्षीर २३ अम्बु २४ शम्बर २५ ॥ ४ ॥ मेघपुष्प २६ घनरस २७ ॥

स्त्रिषु द्वे आप्यमम्मयम् ।

जलविकारके नाम २—आप्य १ अम्मय २ ॥

भंगस्तरंग ऊर्मिर्वा स्त्रियां वीचि—

जलकी तरंगका नाम ४—भंग १ तरंग २ उर्मि ३ वीचि ४ ॥

—रथोर्मिषु ॥ ५ ॥ महत्सूल्लोलकल्लोलौ—

बड़ी तरङ्गके नाम २—॥ ५ ॥ उल्लोल १ कल्लोल २ ॥

स्यादावर्त्तोऽम्भसां भ्रमः ।

जलमें भँवर पड़नेका नाम १—आवर्त्त १ ॥

पृषन्ति बिन्दुपृषताः पुमांसो विप्रुषः स्त्रियाम् ॥ ६ ॥

बिन्दुओंके नाम ४—पृषत् १ बिन्दु २ पृषत ३ विप्रुष् ४ ॥ ६ ॥

चक्राणि पुटभेदाः स्यु—

भँवर पड़कर जलके नीचेको जानेके नाम २—चक्र १ पुटभेद २ ॥

भ्रमाश्च जलनिर्गमाः ॥

जलके निकलनेके जालके नाम २—भ्रम १ जलनिर्गम २ ॥

कूलं रोधश्च तीरं च प्रतीरं च तटं त्रिषु ॥ ७ ॥

नदीके किनारेके नाम ५—कूल १ रोधस् २ तीर ३ प्रतीर ४ तट ५ ॥ ७ ॥

पारावारं पारावाचीं तीरे—

उस पारका नाम १—पार १ ॥

इस पारका नाम १—अवार १ ॥

—पात्रं तदन्तरम्

नदीके पाटका नाम १—पात्र १ ॥

द्वीपोऽस्त्रियामन्तरीपं यदंतर्वारिणस्तटम् ॥ ८ ॥

बेटके नाम २—द्वीप १ अन्तरीप २ ॥ ८ ॥

—तोयोत्थितं तत्पुलिनं—

छड़ावेका नाम १-पुलिन १ ॥

सैकतं सिकतामयम् ।

वालुकाधिकस्थानके नाम २-सैकत १ :सिकतामय २ ॥

निषद्वरस्तु जम्बालः पंकोऽस्त्री शादकर्दमौ ॥ ९ ॥

बोदा (कीच) के नाम ५-निषद्वर १ जम्बाल २ पंक ३ शाद ४ कर्दम ५ ॥ ९ ॥

जलोच्छ्वासाः परीवाहाः—

उफलानेके नाम २-जलोच्छ्वास १ परीवाह२॥

—कूपकास्तु विदारकाः ।

चूहा (सूखी नदीके गड़हे) के नाम २-कूपक १ विदारक २ ॥

नाव्यं त्रिलिंगं नौताय—

नौकामें उतरनेके योग्य जलका नाम १—नाव्य १ ॥

स्त्रियां नौस्तरणिस्तरिः ॥ १० ॥

नौकाके नाम ३—नौ १ तरणि २ तरि ३ ॥ १० ॥

उडुपं तु प्लवः कोलः—

धन्नईके नाम ३—उडुप १ प्लव २ कोल ३ ॥

—स्रोतोऽम्बुसरणं स्वतः ।

स्रोतका नाम १—स्रोतस् १ ॥

आतरस्तरपण्यं स्याद्—

उतराईके नाम २—आतर १ तरपण्य २ ॥

—द्रोणीकाष्ठाम्बुवाहिनी ॥ ११ ॥

पत्थर वा काष्ठनिर्मित नौकाके खड़ीके नाम २—द्रोणी १ काष्ठाम्बुवाहिनी २ ॥ ११ ॥

सांयात्रिकः पोतवणिक्—

नौका लादनेवाले उद्यमीके नाम २—सांयात्रिक १ पोतवणिक् २ ॥

—कर्णधारस्तु नाविकः ।

खेवा लगानेवालेके नाम २—कर्णधार १ नाविक २ ॥

नियामकाः पोतवाहाः—

जो नौकाके पीछे खड़ा हुआ लकड़ी घुमाया करता है उसके नाम२—नियामक १ पोतवाह२ ॥

कूपको गुणवृक्षकः ॥ १२ ॥

जिस खूँटेमें नौका बांधी जाती है उसके नाम—२—कूपक १ गुणवृक्षक २ ॥ १२ ॥

नौकादण्डः क्षेपणी स्या—

पाता (नौकाके दोनों पसवाड़ोंमें बँधे हुए चलानेके काष्ठ) के नाम २—नौकादण्ड १ क्षेपणी २ ॥

—दरित्रं केनिपातकः ।

करिया (नौका की पीठमें लगे हुए चलानेके काठ) के नाम २—अरित्र १ केनिपातक २ ॥

अभ्रिः स्त्री काष्ठकुद्दालः—

नौका साफ करनेके कुदालके नाम २—अभ्रि १ काष्ठकुदाल २ ॥

—सेकपात्रं तु सेचनम् ॥ १३ ॥

जिससे नौकाका जल उलीचा जाता है उसके नाम २—सेकपात्र १ सेचन २ ॥ १३ ॥

क्लीबेऽर्धनावं नावोऽर्धे—

आधी नावका नाम १—अर्द्धनाव १ ॥

—ऽतीतनौकेऽतितु त्रिषु ।

जो नौकालायक जल न हो उसका नाम १—अतितु १ ॥

त्रिष्वागाधात्—

अगाध शब्दपर्यंत जितने शब्द हैं तीनों लिंगोंमें चलते हैं ।

—प्रसन्नोऽच्छः—

निर्मल जलके नाम २-प्रसन्न १ अच्छ २ ॥

—कलुषोऽनच्छ आविलः ॥१४॥

मैल जलके नाम ३–कल्लुष १ अनच्छ २ अ ३ ॥ १४ ॥

निम्नं गभीरं गम्भीर—

गहरे जलके नाम ३–निम्न १ गभीर २ गंभीर ३॥

—मुत्तानं तद्विपर्यये ।

थाह जलका नाम १–उत्तान १॥

अगाधमतलस्पर्शे—

अथाह जलके नाम २–अगाध १ अतलस्पर्श २॥

कैवर्त दाशधीवरौ ॥ १५ ॥

मल्लाहके नाम ३ कैवर्त १ दाश २ धीवर ३ ॥ १५ ॥

आनायः पुंसि जालं स्या—

जालके नाम २–आनाय १ जाल २ ॥

च्छणसूत्र पवित्रकम् ।

शणसूत्र जालके नाम २–शणसूत्र १ पवित्रक २॥

मत्स्याधानी कुवेणी स्या—

जिसमें मछली धरी जायँ उसके नाम २–मत्स्याधानी १ कुवेणी २ ॥

—दृबडिशं मत्स्यवेधनम् ॥ १६ ॥

मछली पकड़नेके काँटेके नाम २– बडिश १ मत्स्यवेधन २ ॥ १६ ॥

पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः । विसारः शकुली चा—

मछलीके नाम ८—पृथुरोमन् १ झष २ मत्स्य ३ मीन ४ वैसारिण ५ अण्डज ६ विसार ७ शकुलिन् ८ ॥

—थ गडकः शकुलार्भकः ॥ १७ ॥

मछलीके बच्चोंके नाम २—गडक १ शकुलार्भक २ ॥ १७ ॥

सहस्रदंष्ट्रः पाठीनः—

पहा मछलीके नाम २—सहस्रदंष्ट्र १ पाठीन २॥

—उल्लूपी शिशुकः समौ ।

सूस मछलीके नाम २—उल्लूपिन् १ शिशुक २॥

नलमीनश्चिलिचिमः—

चेल्हवा मछलीके नाम २—नलमीन १ चिलिचिम २ ॥

—प्रोष्ठी तु शफरी द्वयोः ॥ १८ ॥

सहरी मछलीके नाम २—प्रोष्ठी १ शफरी २ ॥ १८ ॥

क्षुद्राण्डमत्स्यसंघातः पोताधान—

अंडोंसे निकली हुई छोटी मछलीसमूहका नाम १—पोताधान १ ॥

—मथो झषः । रोहितो मद्गुरः शालो राजीवः शकुलस्तिमिः ॥ १९ ॥ तिमिगिलादयश्चा—

रोहू मछलीका नाम—१ रोहित–

मगरी मछलीका नाम १— मद्गुर १ ।

सौरी मछलीका नाम १-शाल १ ।

गथा मछलीका नाम १-राजीव १ ।

सौरा मछलीका नाम १-शकुल १ ।

बड़ी मछलीका नाम १ तिमि १ ॥ १९ ॥

तिमिके निगलनेवाली मछलीका नाम १–

तिमिंगिल १ आदि ॥

—ऽथ यादांसि जलजन्तवः ।

सर्व जन्तुओंके नाम २–यादस् १ जलजन्तु २॥

तद्वदाः शिशुमारोद्रशंकवो मकरादयः ॥ २० ॥

शिशुमका नाम१–शिशुमार१ । ओदका नाम१–उद्र १ । शफूका नाम १–शकु १ । मकरका नाम १–मकर १ आदि ॥ २० ॥

स्यात्कुलीरः कर्कटकः—

केकड़ाके नाम २–कुलीर १ कर्कटक २ ॥

—कूर्मे कमठकच्छपौ ।

कछुईके नाम ३—कूर्म १ कमठ २ कच्छप ३॥

ग्राहोऽवहारः—

घड़ियालके नाम २–ग्राह १ अवहार २ ॥

नक्रस्तु कुम्भीरो—

नाकेके नाम २–नक्र १ कुम्भीर २ ॥

—ऽथ महीलता ॥ २१ ॥

गण्डूपदः किचुलको—

केंचुवाके नाम ३–महीलता १ ॥ २१ ॥ गण्डूपद २ किचुलक ३ ॥

निहाका गोधिका समे ।

गोहके नाम २–निहाका १ गोधिका २ ॥

रक्तपा तु जलौकायां स्त्रियां भूम्नि जलौकसः ॥ २२ ॥

जोंकके नाम ३–रक्तपा १ जलौका २ जलौकस् ३ ॥ २२ ॥

मुक्ताम्फोटः स्त्रियां शुक्तिः—

समुद्रकी सीपीके नाम २–मुक्ताम्फोट १ शुक्ति २ ॥

शंखः स्यात्कम्बुरस्त्रियौ ।

शंखके नाम २—शंख १ कम्बु २ ॥

क्षुद्रशंखाः शंखनखाः—

छोटे शंखके नाम २—क्षुद्रशंख १ शंखनख २॥

—शम्बूका जलशुक्तयः ॥ २३ ॥

सब सीपीके नाम २–शम्बूक १ जलशुक्ति २ ॥ २३ ॥

भेके मण्डूकवर्षाभूशालूरप्लवदर्दुराः ।

मेढकके नाम ६—भेक १ मण्डूक २ वर्षाभू ३ शालूर ४ प्लव ५ दर्दुर ६ ॥

शिली गण्डूपदी—

कछुईके नाम २—शिली १ गण्डूपदी २ ॥

—भेकी वर्षाभ्वी—

मेढकीके नाम २--भेकी १ वर्षाभ्वी २ ॥

—कमठी डुलिः ॥ २४ ॥

नाम २--कमठी १ डुलि २ ॥ २४ ॥

मद्गुरस्य प्रिया शृङ्गी

शींगीका नाम १--शृङ्गी १ ॥

—दुर्नामा दीर्घकोशिका ।

सिंघाड़ेके नाम २--दुर्नामा १ दीर्घकोशिका २॥

जलाशयो जलाधारः—

तडाग झीलादि सब जलाशयोंके नाम २--जलाशय १ जलाधार २ ॥

--स्तत्रागाधजलो ह्रदः ॥ २५ ॥

कुण्डका नाम १--ह्रद १ ॥ २५ ॥

आहावस्तु निपानं स्यादुपकूपजलाशये ।

कूपके निकटकी चरही (जलके लिये बनायी हुई) के नाम २--आहाव १ निपान २ ॥

पुंस्येवान्धुः प्रहिः कूप उदपानं तु पुंसि वा ॥ २६ ॥

कूपके नाम ४--अन्धु १ प्रहि २ कूप ३ उदपान ४ ॥ २६ ॥

नेमिस्त्रिकाऽस्य--

कुएँकी पाठिकाका नाम १--त्रिका १ ॥

—वीनाहो मुखबन्धनमस्य यत् ।

पक्की जगत्का नाम १--वीनाह १ ॥

पुष्करिण्यां तु खातं स्या—

चौकोने तालाबके नाम २--पुष्करिणी १ खात २ ॥

दखातं दैवखातकम् ॥ २७ ॥

नहीं खोदे हुए तालाबके नाम २--अखात १ दैवखातक २ ॥ २७ ॥

पद्माकरस्तडागोऽस्त्री—

जिस तालाबमें कमल हों उसके नाम २–पद्माकर १ तडाग २ ॥

--कासारः सरसी सरः ।

सामान्य तालाबके नाम ३– कासार १ सरसी२ सरस् ३ ॥

वेशन्तःपल्वलं चाल्पसरो—

छोटी तलैयाके नाम ३-वेशन्त १ पल्वल २ अल्पसरस् ३ ॥

—वापी तु दीर्घिका ॥ २८ ॥

बावड़ीके नाम २—वापी १ दीर्घिका २॥२८॥

खेयं तु परिखा—

खाँचा (खाई) के नाम २—खेय १ परिखा २ ॥

—धारस्त्वम्भसां यत्र धारणम् ।

बांधका नाम १—आधार १ ॥

स्यादालवालमावालमावापो—

थालहाके नाम ३-आलवाल १ आवाल २ आवाप ३ ॥

—ऽथ नदी सरित् ॥ २९ ॥ तरंगिणी शैवलिनी तटिनी ह्रादिनी धुनी । स्रोतस्वती द्वीपवती स्रवन्ती निम्नगापगा॥३०॥

नदीके नाम १२-नदी १ सरित् २ ॥ २९ ॥ तरंगिणी ३ शैवलिनी ४ तटिनी ५ ह्रादिनी ६ धुनी ७ स्रोतस्वती ८ द्वीपवती ९ स्रवन्ती १० निम्नगा ११ आपगा १२ ॥ ३० ॥

गंगा विष्णुपदी जह्नुतनया सुरनिम्नगा । भागीरथी त्रिपथगा त्रिस्रोता भीष्मसूरपि ॥ ३१ ॥

गंगाजीके नाम ८--गंगा १विष्णुपदी २ जह्नुतनया ३ सुरनिम्नगा ४ भागीरथी ५ त्रिपथगा ६ त्रिस्रोतस् ७ भीष्मसू ८ ॥ ३१ ॥

कालिन्दी सूर्यतनया यमुना शमनस्वसा ।

यमुनाके नाम ४---कालिन्दी १ सूर्यतनया २ यमुना ३ शमनस्वसृ ४ ॥

रेवा तु नर्मदा सोमोद्भवा मेकलकन्यका ॥ ३२ ॥

नर्मदाके नाम ४--रेवा १ नर्मदा २ सोमोद्भवा ३ मेकलकन्यका ४ ॥ ३२ ॥

[illegible] स्त्वगारा—

गौरीविवाहमें जो कन्यादानजलसे उत्पन्न हुई उस नदीके नाम २--करतोया १ सदानीरा २ ॥

—बाहुदा सैतवाहिनी ।

सहस्रबाहुकी नदीके नाम २--बाहुदा १ सैतवाहिनी ॥ २ ॥

शतद्रुस्तु शुतुद्रिः स्या—

शतलजके नाम २--शतद्रु १ शुतुद्रि २॥

—द्विपाशा तु विपाट् स्त्रियाम् ३३

व्यास नदीके नाम २--विपाशा १ विपाट् २ ॥ ३३ ॥

शोणो हिरण्यवाहः स्या—

शोणभद्रके नाम २--शोण १ हिरण्यवाह २ ॥

—कुल्यात्वा कृत्रिमा सरित् ।

नहरका नाम १--कुल्या १ ॥

शरावती वेत्रवती चन्द्रभागा सरस्वती ॥ ३४ ॥ कावेरी—

शरावतीका नाम १-शरावती १ । वेत्रवतीका नाम १-वेत्रवती १ । चिनावका नाम १-चन्द्रभागा १ । सरस्वतीका नाम १-सरस्वती १ । ॥ ३४ ॥ कावेरीका नाम १ कावेरी १ ।

—सरितोऽन्याश्च—

और भी कौशिकी आदि नदियां हैं ।

—संभेदः सिन्धुसंगमः ।

जहां एक नदी दूसरीसे मिलती है उस संगमके नाम २-सम्भेद १ सिन्धुसंगम २ ॥

द्वयोः प्रणाली पयसः पदव्यां—

पनारका नाम १-प्रणाली १ ॥

—त्रिषु तूत्तरौ ॥ ३५ ॥

आगे होनेवाले दोनों शब्द तीनों लिंगोंमें होते हैं ॥ ३५ ॥

देविकायां सरय्वां च भवेदाविकसारवौ ।

देविका नदीमें जो जो उत्पन्न हों उनका नाम

१–दाविक १॥ सरयूमें जो जो उत्पन्न हों उनका नाम १–सारव १ ।

सौगन्धिकं तु कह्लारं–

कई (संध्यामें खिलनेवाले श्वेतकमल) के नाम २–सौगंधिक १ कह्लार २ ॥

—हल्लकं रक्तसन्ध्यकम् ॥ ३६ ॥

लाल कुईके नाम २–हल्लक १ रक्तसन्ध्यक २ ॥ ३६ ॥

स्यादुत्पलं कुवलय–

कुमुदकमल साधारणके नाम २–उत्पल १ कुवलय २ ॥

—मथ नीलाम्बुजन्म च ।
इन्दीवरं च नीलेऽस्मिम्–

काले कमलके नाम २–नीलाम्बुजन्मन् १ इन्दीवर २ ॥

—सितं कुमुदकैरवं ॥ ३७ ॥

उज्ज्वल कमलके नाम २—कुमुद १ कैरव २ ॥ ३७ ॥

शालूकमंषां कन्दः स्या–

कमलोंके कन्दका नाम १–शालूक १॥

द्वारिपर्णी तु कुम्भिका ।

जलकुम्भीके नाम २—वारिपर्णी १ कुम्भिका २ ॥

जलनीली तु शेवालं शैवलो–

शैवालके नाम ३—जलनीली १ शेवाल २ शैवल ३ ॥

—ऽथ कुमुद्वती ॥ ३८ ॥ कुमुदिन्यां–

कुमुदिनी या कुमुदयुक्त देशके नाम २–कुमुद्वती १ ॥ ३८ ॥ कुमुदिनी २ ॥

—नलिन्यां तु बिसिनीपद्मिनीमुग्धाः ।

कमलिनीके नाम ३—नलिनी १ बिसिनी २ पद्मिनी ३ मुग्धा ॥

वा पुंसि पद्मं नलिनमरविन्दं महोत्पलम् ॥ ३९ ॥ सहस्रपत्रं कमलं शतपत्रं कुशेशयम् । पंकेरुहं तामरसं सारसं सरसीरुहम् ॥ ४० ॥ बिसप्रसूनराजीवपुष्कराम्भोरुहाणि च ।

कमलमात्रके नाम १६–पद्म १ नलिन २ अरविन्द ३ महोत्पल ४ ॥ ३९ ॥ सहस्रपत्र ५ कमल ६ शतपत्र ७ कुशेशय ८ पंकेरुह ९ तामरस १० सारस ११ सरसीरुह १२ ॥ ४० ॥ बिसप्रसून १३ राजीव १४ पुष्कर १५ अम्भोरुह १६ ॥

पुण्डरीकं सिताम्भोज–

उज्ज्वल कमलके नाम २—पुण्डरीक १ सिताम्भोज २ ॥

–मथ रक्तसरोरुहे॥४१॥रक्तोत्पलंकोकनदं

लाल कमलके नाम ३–रक्तसरोरुह १ ॥ ४१ ॥ रक्तोत्पल २ कोकनद ३ ॥

—नालो नाल–

कमलकी डंडीके नाम २–नाल (पुंलिंग) १ १ नाल (नपुंसकलिंग) २ ॥

—मथास्त्रियाम् । मृणालं बिस–

मृणालके नाम २—मृणाल १ बिस २ ॥

—मब्जादिकदम्बे खंडमस्त्रियाम् ॥४२॥

कमलादिके समूहका नाम १–खण्ड १ ॥ केवल स्त्री नाम १–खण्ड १ ॥ ४२ ॥

करहाटः शिफाकन्दः–

कमलकी जड़के नाम२–करहाट१शिफाकन्द२ ॥

—किञ्जल्कः केसरोऽस्त्रियाम् ।

कमल पुष्पके मध्यमें जो झालर होती है उसके नाम २—किंजल्क १ केसर २ ॥

संवर्तिका नवदलं–

कमलके नये पत्तोंके नाम २–संवर्तिका १ नवदल २ ॥

—बीजकोशो वराटकः ॥ ४३ ॥

कमलाक्षके नाम २–बीजकोश १ वराटक २ ॥ ४३ ॥

उक्तं स्वर्व्योमदिक्कालधीशब्दादि सनाम्यकम् । पातालभोगि नरकं वारि चैषां च सद्गतम् ॥ ४४ ॥ इत्यमरसिंहकृतौ नामलिंगानुशासने । स्वरादिकांडः प्रथमः सांग एव समर्थितः ॥ १ ॥

इति श्रीगदमरसिंहविरचितामरकोशस्य भाषाटीकायां वारिवर्गः ॥ १० ॥

इति प्रथमः कांडः समाप्तः ।

श्रीः ।

अथ द्वितीयः काण्डः ।

अथ भूमिवर्गः १.

वर्गाः पृथ्वीपुरक्ष्माभृद्वनौषधिमृगादिभिः । नृब्रह्मक्षत्रविट्शूद्रैः सांगोपांगैरिहोदिताः ॥ १ ॥

इस द्वितीय काण्डमे भूमिवर्ग १, पुरवर्ग २, शैलवर्ग ३, वनौषधिवर्ग ४, सिंहादिवर्ग ५, मनुष्य वर्ग ६, ब्रह्मवर्ग ७, क्षत्रियवर्ग ८, वैश्यवर्ग ९, शूद्रवर्ग १० सांगोपांग कहेंगे ॥ १ ॥

भूर्भूमिरचलानन्ता रसा विश्वंभरा स्थिरा । धरा धरित्री धरणिः क्षोणिर्ज्या काश्यपी क्षितिः ॥ २ ॥ सर्वंसहा वसुमती वसुधोर्वी वसुंधरा । गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥ ३ ॥

पृथ्वीके नाम २७–भू १ भूमि २ अचला ३ अनन्ता ४ रसा ५ विश्वम्भरा ६ स्थिरा ७ धरा ८ धरित्री ९ धरणि १० क्षोणि ११ ज्या १२ काश्यपी १३ क्षिति १४ ॥ २ ॥ सर्वंसहा १५ वसुमती १६ वसुधा १७ उर्वी १८ वसुन्धरा १९ गोत्रा २० कु २१ पृथिवी २२ पृथ्वी २३ क्ष्मा २४ अवनि २५ मेदिनी २६ मही २७ ॥ ३ ॥

मृन्मृत्तिका—

मिट्टीके नाम २–मृत् १ मृत्तिका २ ॥

—प्रशस्ता तु मृत्सा मृत्स्ना च मृत्तिका ।

अच्छी मिट्टीके नाम २–मृत्सा १ मृत्स्ना २ ॥

उर्वरा सर्वसस्याढ्या—

जिस मिट्टीसे सब अन्न उपजें उसका नाम १–उर्वरा १ ॥

स्यादूषः क्षारमृत्तिका ॥ ४ ॥

खारी मिट्टी अर्थात् नोनीके नाम २—ऊष १–क्षारमृत्तिका २ ॥ ४ ॥

ऊषवानूषरो द्वावप्यन्यल्लिंगो—

कल्लरभूमिके नाम २—ऊषवत् १ ऊषर २ ॥

—स्थलं स्थली ।

स्थलके नाम २—स्थल १ स्थली २ ॥

समानौ मरुधन्वानौ—

निर्जल अर्थात् मरुदेशके नाम २—मरु १ धन्वन २ ॥

—द्वे खिलाप्रहते समे ॥ ५ ॥ त्रि—

विजोत खेतके नाम २—खिल १ अप्रहत २ ॥ ५ ॥

स्वथो जगती लोको विष्टपं भुवनं जगत् ।

जगत्के नाम ५—जगती १ लोक २ विष्टप ३ भुवन ४ जगत् ५ ॥

लोकोऽयं भारतं वर्षे—

हिमालयसे दक्षिण समुद्रसे उत्तरके देशतक अर्थात् हिन्दुस्तानका नाम १–भारतवर्ष १ ॥

—शरावत्यास्तु योऽवधेः ॥ ६ ॥ देशः प्राग्दक्षिणः प्राच्य—

शरावती नदीके ॥ ६ ॥ पूर्व दक्षिण देशके नाम १–प्राच्य १ ॥

—उदीच्यः पश्चिमोत्तरः ।

शरावती नदीके पश्चिमोत्तरदेशका नाम–१ उदीच्य १ ॥

प्रत्यन्तो म्लेच्छदेशः स्या—

फारस रूस रूम आदि देशोंके नाम २–प्रत्यन्त १ म्लेच्छदेश २ ॥–

—न्मध्यदेशस्तु मध्यमः ॥ ७ ॥

विन्ध्याचलसे उत्तर, हिमालयसे दक्षिण, कुरुक्षेत्रसे पूर्व, प्रयागसे पश्चिम देशके नाम २-मध्यदेश १ मध्यम २ ॥ ७ ॥

आर्यावर्त्तः पुण्यभूमिर्मध्यं विन्ध्यहिमालयोः ।

बंगालके समुद्रसे पश्चिम, अरबसमुद्रसे पूर्व, हिमाचलसे दक्षिण, विन्ध्याचलसे उत्तर देशके नाम २-आर्यावर्त्त १ पुण्यभूमि ॥ ८ ॥

नीवृज्जनपदो—

राजाओंके बसाये हुए मगध आदि देशोंके नाम २-नीवृत् १ जनपद २ ॥

—देशविषयौ तूपवर्त्तनम् ॥ ८ ॥

देशमात्रके नाम ३-देश १ विषय २ उपवर्त्तन ३ ॥ ८ ॥

त्रिष्वागोष्ठा—

गोष्ठपर्यन्त जो शब्द हैं वे तीनों लिंगोंमें होते हैं ॥

—व्रडप्राये नड्वान्व्रड्वल इत्यपि ।

नडाधिकदेशके नाम २-नड्वत् १ व्रड्वल २ ॥

कुमुद्वान्कुमुदप्राय—

जहां बहुत कुमुद हों उस देशका नाम १-कुमुद्वत् १ ॥

—वेतस्वान्बहुवेतसे ॥ ९ ॥

जहां बहुत वेत हों उस देशका नाम १-वेतस्वत् १ ॥ ९ ॥

शाद्वलः शादहरिते—

जहां हरी घास हो उसका नाम १-शाद्वल १ ॥

—सजम्बाले तु पंकिलः ।

जहां बहुत कीच हो उस देशका नाम १-पंकिल १ ॥

जलप्रायमनूपं स्यात्पुंसि कच्छस्तथाविधः ॥ १० ॥

जहां बहुत पानी हो उस देशके नाम ३-जलप्राय १ अनूप २ कच्छ ३ ॥ १० ॥

स्त्री शर्करा शर्करिलः शार्करः शर्करावति ।

जहां रेता हो उस देशके नाम ४-शर्करा १ शर्करिल २ शार्कर ३ शर्करावत् ४ ॥

देश एवादिमा—

ऊपर कहे हुए शर्करा आदि शब्दोंमें पहले शर्करा १ और शर्करिल यह दोनों देशके ही नाम हैं ॥

—वेवसुत्रेयाः सिकतावति ॥ ११ ॥

इसी प्रकार सिकता १ और सिकतिल यह शब्द भी रेतेयुक्त देशके ही नाम हैं ॥ ११ ॥

देशो नद्यम्बुवृष्ट्यम्बुसंपन्नव्रीहिपालितः । स्यान्नदीमातृको देवमातृकश्च यथाक्रमम् ॥ १२ ॥

जहां केवल नदीजलसे खेत सींचे जायं वर्षा न होती हो उस देशका नाम १-नदीमातृक १ ॥ जहां वर्षाके ही जलसे सींचे जायं उसका नाम १-देवमातृक १ ॥ १२ ॥

सुराज्ञि देशे राजन्वान्स्या—

धर्मात्मा राजाके देशका नाम १-राजन्वत् १ ॥

—ततोऽन्यत्र राजवान् ।

सामान्य राजाके देशका नाम १-राजवत् ॥

गोष्ठं गोस्थानकं—

गोष्ठके नाम २-गोष्ठ १ गोस्थान २ ॥

तत्तु गौष्ठीनं भूतपूर्वकम् ॥ १३ ॥

जहां पूर्वकालमें गायें रही हों उसका नाम १-गौष्ठीन १ ॥ १३ ॥

पर्यन्तभूः परिसरः—

नदी पर्वतादिके समीपकी भूमिके नाम २-पर्यंतभू १ परिसर २ ॥

—सेतुरालौ स्त्रियां—

पुलके नाम २-सेतु १ आलि २ ॥

पुमान् । वामलूरश्च नाकुश्च वल्मीकं पुंनपुंसकम् ॥ १४ ॥

बमईके नाम ३—बामूर १ नाकु २ वल्मीक ३ ॥ १४ ॥

अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिः । सरणिः पद्धतिः पद्यावर्त्तन्येकपदीतिः च ॥ १५ ॥

मार्गके नाम १२-अयन १ वर्त्मन् २ मार्ग ३ अध्वन् ४ पथिन् ५ पदवी ६ सृति ७ सरणि ८ पद्धति ९ पद्या १० वर्त्तनी ११ एकपदी १२ ॥ १५ ॥

अतिपन्थाः सुपन्थाश्च सत्पथश्चार्चितेऽध्वनि ।

अच्छे मार्गके नाम ३-अतिपथिन् १ सुपथिन् २ सत्पथ ३ ॥

व्यध्वो दुरध्वो विपथः कदध्वा कापथः समाः ॥ १६ ॥

खराब मार्गके नाम ५-व्यध्व १ दुरध्व २ विपथ ३ कदध्वन् ४ कापथः ५ ॥ १६ ॥

अपन्थास्त्वपथं तुल्ये—

जहां मार्ग न हो उसके नाम २-अपथिन् १ चतुष्पथ २ ॥

—शृंगाटकचतुष्पथे ।

चौहट्टा वा चौकके नाम २-शृङ्गाटक १ चतुष्पथ २ ॥

प्रान्तरं दूरशून्येऽध्वा—

जहां बहुत दूरतक छाया वा मनुष्यादि न हों उस मार्गका नाम १-प्रान्तर १ ॥

कान्तारं वर्त्म दुर्गमम् ॥ १७ ॥

चोरकण्टकादियुक्त मार्गका नाम १-कान्तार १ ॥ १७ ॥

गव्यूतिः स्त्री क्रोशयुगं—

दो कोशका नाम १-गव्यूति १ ॥

—नल्वः किष्कुचतुःशतम् ।

४०० हाथका नाम १-नल्व १ ॥

घण्टापथः संसरणं—

राजमार्ग अर्थात् सड़कके नाम २-घण्टापथ १ संसरण २ ॥—

—तत्पुरस्योपनिष्करम् ॥ १८ ॥

ग्रामके निकासका नाम १—उपनिष्कर १ ॥ १८ ॥

इति भूमिवर्गः ॥ १ ॥

अथ पुरवर्गः २.

पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनम् । स्थानीयं निगमे—

शहरके नाम ७-पुर १ पुरी २ नगरी ३ पत्तन ४ पुटभेदन ५ स्थानीय ६ निगम ७ ॥

—ऽन्यत्तु यन्मूलनगरात्पुरम् ॥ १ ॥ तच्छाखानगरं—

शहर सम्बन्धी छोटे नगरोंका नाम १— ॥ १ ॥ शाखानगर १ ॥

—वेशो वेश्याजनसमाश्रयः ।

वेश्याके स्थानके नाम २-वेश १ वेश्याजनसमाश्रय २ ॥

आपणस्तु निषद्यायां—

बजारके नाम २-आपण १ निषद्या २ ॥

—विपणिः पण्यवीथिका ॥ २ ॥

जहां बाजार न हो परन्तु वस्तु बिकती हों उसके नाम २-विपणि १ पण्यवीथिका २ ॥ २ ॥

रथ्या प्रतोली विशिखा—

बीचगांवकी गलीके नाम ३-रथ्या १ प्रतोली २ विशिखा ३ ॥

—स्याच्चयो वप्रमस्त्रियाम् ।

किलेके इधर उधरकी मिट्टीके नाम २—चय १ वप्र २ ॥

प्राकारो वरणः सालः—

किलेके नाम ३-प्राकार १ वरण २ साल ३ ॥

—प्रैचीनं प्रान्ततो वृतिः ॥ ३ ॥

चारों ओर कांटोंकी वाडका नाम १–प्राचीन १ ॥ ३ ॥

भित्तिः स्त्री कुड्य—

दीवारके नाम २–भित्ति १ कुड्य २ ॥

—मेड्डकं यदन्तर्न्यस्तकीकसम् ॥

जिस दीवारमें मजबूतीके वास्ते हड्डी आदि लगाई गई हों उसका नाम १ एड्डक १ ॥

गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ॥ ४ ॥ निशान्तपस्त्यसदनं भवनागारमन्दिरम् । गृहाः पुंसि च भूम्न्येव निकाय्यनिलयालयाः ॥ ५ ॥ वासः कुटी द्वयोः शाला सभा—

गृहके नाम २०–गृह १ गेह २ उदवसित ३ वेश्मन् ४ सद्मन् ५ निकेतन ६ ॥ ४ ॥ निशान्त ७ पस्त्य ८ सदन ९ भवन १० अगार ११ मंदिर १२ गृह (पुं० बहुवचन) १३ निकाय्य १४ निलय १५ आलय १६ ॥ ५ ॥ वास १७ कुटी १८ शाला १९ सभा २० ॥

संजवनं त्विदम् । चतुःशालं—

जिस गृहमें आमने सामने एकसे चार मकान हों उसके नाम २–संजवन १ चतुश्शाल २ ॥

मुनीनां तु पर्णशालोटजोऽस्त्रियाम् ॥६॥

मुनियोंकी कुटीके नाम २–पर्णशाला १ उटज २ ॥ ६ ॥

चैत्यमायतनं तुल्ये—

यज्ञशालाके नाम २–चैत्य १ आयतन २ ॥

वाजिशाला तु मन्दुरा ।

घुड़सालके नाम २–वाजिशाला १ मन्दुरा २ ॥

आवेशनं शिल्पिशाला—

कारीगरोंके स्थानके नाम २–आवेशन १ शिल्पिशाला २ ॥

—प्रपा पानीयशालिका ॥ ७ ॥

गौशाला अर्थात् पानी पिलानेके स्थानके नाम २–प्रपा १ पानीयशालिका २ ॥ ७ ॥

मठश्छात्रादिनिलयः—

विद्यार्थी और संन्यासी आदिके रहनेके स्थानका नाम १–मठ १ ॥

—गञ्जा तु मदिरागृहम् ।

जहां मद्य बनाया जाय अथवा जहां मद्य रखा जाय उस स्थानके नाम २–गञ्जा १ मदिरागृह २॥

गर्भागारं वासगृह—

गृहके मध्यभागके नाम २–गर्भागार १ वासगृह २ ॥

—मरिष्टं सूतिकागृहम् ॥ ८ ॥

सोवरके (प्रसूतीके) गृहके नाम २–अरिष्ट १ सूतिकागृह २ ॥ ८ ॥

वातायनं गवाक्षो—

झरोखोंके नाम २–वातायन १ गवाक्ष २ ॥

—ऽथ मण्डपोऽस्त्री जनाश्रयः ।

मण्डपके नाम २–मण्डप १ जनाश्रय २ ॥

हर्म्यादि धनिनां वासः—

धनवानोंके गृहका नाम १–हर्म्य १ आदि ॥

—प्रासादो देवभूभुजाम् ॥ ९ ॥

देवता और राजाओंके गृहका नाम १–प्रासाद १ ॥ ९ ॥

सौधोऽस्त्री राजसदन—

राजाओंके गृहके नाम २–सौध १ राजसदन २ ॥

—मुपकार्योपकारिका ।

राजाओंके साधारण गृहोंके नाम २–उपकार्या १ उपकारिका २ ॥

स्वस्तिकः सर्वतोभद्रो नन्द्यावर्त्तादयोऽपि च ॥ १० ॥ स्विच्छन्दकः प्रभेदा हि भवन्तीश्वरसद्मनाम् ।

राजगृहोंके भेद जिनमें ४ दरवाजे आदि भेद हैं ॥ स्वस्तिक १ सर्वतोभद्र २ नन्द्यावर्त्त ३ ॥ १० ॥ स्विच्छन्दक ४ इत्यादि ।

स्त्र्यगारं भूभुजामन्तःपुरं स्यादवरोधनम् ॥ ११ ॥ शुद्धान्तश्चावरोधश्च—

राजस्त्रियोंके रहनेके स्थानके नाम ४-अन्तः-पुर १ अवरोधन २ ॥ ११ ॥ शुद्धान्त ३ अव-रोध ४ ॥

स्यादङ्गः क्षौममस्त्रियाम् ।

गृहके ऊपरके घरके नाम २-अङ्ग १ क्षौम २ ॥

प्रघाणप्रक्रणालिन्दा बहिर्द्वारप्रकोष्ठकं ॥ १२ ॥

देहलीजके नाम ३-प्रघाण १ प्रक्रण २ अलिन्द ३ ॥ १२ ॥

गृहावग्रहणीदेह—

देहलीके नाम २-गृहावग्रहणी १ देहली २ ॥

—त्वङ्गणं चत्वरा जिरे ।

आंगनके नाम ३-अंगण १ चत्वर २

अधस्ताद्दारुणि शिला—

दरवाजेके नीचेके काठका नाम १-शिला १

—नासादारूपरि स्थितम् ॥ १३ ॥

दरवाजेके ऊपरके काठका नाम -१नासा१ ।१३

प्रच्छन्नमन्तर्द्वारं स्या—

खिड़कीके नाम २-प्रच्छन्न १ अन्तर्द्वार २ ॥

—त्पक्षद्वारं तु पक्षकम् ।

बगलके द्वारके नाम २-पक्षद्वार १ पक्षक २ ॥

वलीकनीध्रे पटलप्रान्ते—

वरौनीके नाम ३-वलीक १ नीध्र २ पटल-प्रान्त ३ ॥

—ऽथ पटलं छदिः ॥ १४ ॥

छानिके नाम २-पटल १ छदि २ ॥ १४ ॥

गोपानसी तु वलभी छादने वक्रदारुणि ।

छज्जेके नाम २-गोपानसी १ वलभी २ ॥

कपोतपालिकायां तु विटंकं पुंनपुंसकम् ॥ १५ ॥

कबूतरखानेके नाम २-कपोतपालिका १ विटंक २॥ १५ ॥

स्त्री द्वाद्वारं प्रतीहारः—

द्वारके नाम ३-द्वार् १ द्वार २ प्रतीहार ३ ॥

—स्याद्वितर्दिस्तु वेदिका ।

वेदीके नाम २-वितर्दि १ वेदिका २ ॥

तोरणोऽस्त्री बहिर्द्वारं—

घरके बाहरके फाटकके नाम २-तोरण १ बहिर्द्वार २-

—पुरद्वारं तु गोपुरम् ॥ १६ ॥

नगरके बाहरके फाटकके नाम २-पुरद्वार १ गोपुर २ ॥ १६ ॥

कूटं पृद्वारि यद्धस्तिनखस्तस्मिन—

नगरके द्वारसे उतरनेके लिये उतार चढावकी भूमिका नाम १-हस्तिनख १ ॥

—अथ त्रिषु । कपाटमररं तुल्ये—

किवाड़ोंके नाम २-कपाट १ अरर २ ॥

—तद्विष्कम्भोऽर्गलं नना ॥ १७ ॥

किवाड़ोंके डण्डेलेका नाम १-अर्गल १ ॥१७ ॥

आरोहणं स्यात्सोपानं—

मिट्टी पत्थर आदिकी सीढीके नाम २-आरोहण १ सोपान २ ।

—निश्रेणिस्त्वधिरोहणी ।

काठकी सीढ़ीके नाम २-निश्रेणि १ अधि-रोहणी २ ॥

संमार्जनी शोधनी स्यात्—

बुहारी अर्थात् झाड़ूके नाम २-संमार्जनी १ शोधनी २ ॥

—संकरोऽवकरस्तथा ॥ १८ ॥

करकट वा कूड़ेके नाम २-संकर १ अवकर २ ॥ १८ ॥

क्षिप्ते मुखं निःसरणं—

निकासके नाम २-मुख १ निःसरण २ ॥

—संनिवेशो निकर्षणम् ।

नगर इत्यादिमें स्थानके निमित्त मापी हुई भूमिके नाम २–संनिवेश १ निकर्षण २ ॥

समौ संवसथग्रामौ—

ग्रामके नाम २–संवसथ १ ग्राम २ ॥

—वेश्मभूर्वास्तुरस्त्रियाम् ॥ १९ ॥

घरकी भूमिका नाम १–वास्तु १ ॥ १९ ॥

ग्रामान्त उपशल्यं स्यात्—

ग्रामके समीपका नाम १–उपशल्य १ ॥

—सीमसीमे स्त्रियामुभे ।

सीमाके नाम २–सीमन् १ सीमा २ ॥

घोष आभीरपल्ली स्यात्—

अहीरोंके ग्रामके नाम २–घोष १ आभीरपल्ली २

—पक्कणः शबरालयः ॥ २० ॥

जंगलियोंके ग्रामके नाम २–पक्कण १ शबरालय २ ॥ २० ॥

इति पुरवर्गः ॥ २ ॥

अथ शैलवर्गः ३.

महीध्र शिखरिक्ष्माभृदहार्यधरपर्वताः । अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः ॥ १ ॥

पर्वतके नाम २३–महीध्र १ शिखरिन् २ क्ष्माभृत् ३ अहार्य ४ धर ५ पर्वत ६ अद्रि ७ गोत्र ८ गिरि ९ ग्रावन् १० अचल ११ शैल १२ शिलोच्चय १३ ॥ १ ॥

लोकालोकश्चक्रवाल—

जो पर्वत पृथ्वीको धरे हैं उनके नाम २–लोकालोक १ चक्रवाल २ ॥

—त्रिकूटस्त्रिककुत्समौ ।

त्रिकूट कि जिसपर लंका बसी उसके नाम २–त्रिकूट १ त्रिककुद् २ ॥

अस्तस्तु चरमक्ष्माभृ—

अस्ताचलके नाम २–अस्त १ चरमक्ष्माभृत् २॥

—उदयः पूर्वपर्वतः ॥ २ ॥

उदयाचलके नाम २–उदय १ पूर्वपर्वत २ ॥२॥

हिमवान्निषधो विन्ध्यो माल्यवान्पारियात्रकः । गन्धमादनमन्ये च हेमकूटादयो नगाः ॥ ३ ॥

पर्वतोंके भेद ६–हिमवत् १ निषध २ विन्ध्य ३ माल्यवत् ४ पारियात्रक ५ गन्धमादन ६ तथा हेमकूट आदि अन्य भी पर्वत हैं ॥ ३ ॥

पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत् ।

पत्थरके नाम ७–पाषाण १ प्रस्तर २ ग्रावन् ३ उपल ४ अश्मन् ५ शिला ६ दृषत् ७ ॥

कूटोऽस्त्री शिखरं शृङ्ग—

पहाड़की चोटी वा कंगूरेके नाम ३–कूट १ शिखर २ शृङ्ग ३ ॥

—प्रपातस्त्वतटो भृगुः ॥ ४ ॥

बीहड़के नाम ६–प्रपात १ अतट २ भृगु ३ ॥ ४ ॥

कटकोऽस्त्री नितम्बोऽद्रेः—

बीच पर्वतका नाम १–कटक १ ॥

—स्नुः प्रस्थः सानुरस्त्रियाम् ।

पर्वतके किनारेके नाम ३–स्नु १ प्रस्थ २ सानु ३ ॥

उत्सः प्रस्रवणं—

जहां पर्वतसे चूकर पानी बटुरता है अर्थात् कुण्डके नाम २–उत्स १ प्रस्रवण २ ॥

—वारिप्रवाहो निर्झरो झरः ॥ ५ ॥

झरनोंके नाम ३–वारिप्रवाह १ निर्झर २ झर ३ ॥ ५ ॥

दरी तु कन्दरो वा स्त्री—

बनाई हुई गुफाके नाम २–दरी १ कन्दर–कन्दरा २ ॥

—दैवखातबिले गुहा । गह्वरं—

अपने आप बनी हुई गुफाके नाम ४–देवखात १ बिल २ गुहा ३ गह्वर ४ ॥

—गण्डशैलास्तु च्युताः स्थूलोपला गिरेः ॥ ६ ॥

जो कि पर्वतसे भारी भारी पत्थर गिरते हैं उनका नाम १-गण्डशैल १ ॥ ६ ॥

खनिः स्त्रियामाकरः स्यात्—

खानिके नाम २-खनि १ आकर २ ॥

—पादाः प्रत्यंतपर्वताः ।

पर्वतके समीप छोटे पर्वतके नाम २-पाद १ प्रत्यन्तपर्वत २ ॥

उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ ७ ॥

पहाड़के नीचेकी भूमिका नाम १-उपत्यका १ ॥ पहाड़की ऊपरकी भूमिका नाम १-अधित्यका १ ॥ ७ ॥

धातुर्मनःशिलाद्यद्रेर्गैरिकं तु विशेषतः ।

पर्वतसे उत्पन्न हुए जो मनःशिल आदिका नाम १-धातु १ । गैरिक (गेरू) तो धातु शब्दसे ही विख्यात है ।

निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे ॥ ८ ॥

जहां कि बहुत लतातृणादिसे घिरा हो उसके नाम २-निकुञ्ज १ कुञ्ज २ ॥ ८ ॥

इति शैलवर्गः ॥ ३ ॥

अथ वनौषधिवर्गः ४.

अटव्यरण्यं विपिनं गहनं कानने वनम् ।

वनके नाम ६-अटवी १ अरण्य २ विपिन ३ गहन ४ कानन ५ वन ६ ॥

महारण्यमरण्यानी—

बड़े वनके नाम २-महारण्य १ अरण्यानी २ ॥

—गृहारामास्तु निष्कुटाः ॥ १ ॥

गृहके समीप बनाये हुए बगीचेके नाम २-गृहाराम १ निष्कुट २ ॥ १ ॥

आरामः स्यादुपवनं कृत्रिमं वनमेव यत् ।

गृहसमीपके वनके नाम २-आराम १ उपवन २।

अमात्यगणिकागेहोपवने वृक्षवाटिका ॥ २ ॥

जहां राजाके नौकर चाकर और उनकी वेश्या रहें उस बगीचेका नाम १-वृक्षवाटिका १ ॥ २ ॥

पुमानाक्रीड उद्यानं राज्ञः साधारणं वनम् ।

राजाके उस बगीचेका नाम जिसका सब पुरुष भोग कर सकें १-आक्रीड १ ॥

स्यादेतदेव प्रमदवनमंतःपुरोचितम् ॥ ३ ॥

जहां राजा स्त्रियों सहित क्रीडा करें उस बगीचेका नाम १-प्रमदवन १ ॥ ३ ॥

वीथ्यालिरावलिः पंक्तिः श्रेणी—

पंक्तिके नाम ५-वीथी १ आलि २ आवलि ३ पंक्ति ४ श्रेणी ५ ॥

—लेखास्तु राजयः ।

लकीरके नाम २-लेखा १ राजि २ ॥

वन्या वनसमूहे स्या—

वनके झुंडके नाम २-वन्या १ वनसमूह २ ॥

दंकुरोऽभिनवोद्भिदि ॥ ४ ॥

अंकुरके नाम २-अंकुर १ अभिनवोद्भिद् २ ।४।

वृक्षो महीरुहः शाखी विटपी पादपस्तरुः । अनोकहः कुटः शालः पलाशी द्रुद्रुमागमाः ॥ ५ ॥

वृक्षके नाम १३-वृक्ष १ महीरुह २ शाखिन् ३ विटपिन ४ पादप ५ तरु ६ अनोकह ७ कुट ८ शाल ९ पलाशिन १० द्रु ११ द्रुम १२ अगम १३ ॥ ५ ॥

वानस्पत्यः फलैः पुष्पात्—

जो वृक्ष फूलकर फले उसका नाम १-वानस्पत्य १ ॥

—तैरपुष्पाद्वनस्पतिः ।

जो कि फूलने बिना फलें जैसे गूलर कटहर आदि उसका नाम १-वनस्पति १ (वृक्षमात्रको भी वनस्पति कहते हैं) ॥

ओषध्यः फलपाकान्ताः स्यु—

फलकर पकनेपर नष्ट होनेवाले अर्थात् अन्न आदिका नाम १-ओषधी १ ॥

स्वन्ध्यः फलेग्रहिः ॥ ६ ॥

फलनेवाले वृक्षके नाम २-अवन्ध्य १ फलेग्रहि २ ॥ ६ ॥

वन्ध्योऽफलोऽवकेशी च—

जो नहीं फले उस वृक्षके नाम ३-वन्ध्य १ अफल २ अवकेशिन् ३ ॥

फलवान् फलिनः फली ।

फलयुक्त वृक्षके नाम ३-फलवत् १ फलिन २ फलिन् ३ ॥

प्रफुल्लोत्फुल्लसंफुल्लव्याकोशविकच-स्फुटाः ॥ ७ ॥ फुल्लश्चैते विकसिते—

फूलयुक्त (विकसित) वृक्षके नाम ८-प्रफुल्ल १ उत्फुल्ल २ संफुल्ल ३ व्याकोश ४ विकच ५ स्फुट ६ ॥ ७ ॥ फुल्ल ७ विकसित ८ ॥

स्युरवन्ध्यादयस्त्रिषु ।

अवंध्य आदि शब्द तीनों लिंगोंमें होते हैं ॥

स्थाणुर्वा ना ध्रुवः शंकु—

ठूठ वृक्षके नाम ३-स्थाणु १ ध्रुव २ शंकु ३ ॥

ह्रस्वशाखाशिफः क्षुपः ॥ ८ ॥

जिस वृक्षमें छोटी २ डालें और जड़ें हों उसका नाम १-क्षुप १ ॥ ८ ॥

अप्रकाण्डे स्तम्बगुल्मौ—

जिसमें डालियां न हों उस वृक्षके नाम २-स्तम्ब १ गुल्म २ ॥

वल्ली तु प्रततिर्लता ।

(कबूतरोंके समूहका नाम) कापोत ॥ (तोतोंके समूहका नाम) शौक ॥ (मयूरोंके समूहका नाम) मायूर ॥ (तीतरोंके समूहका नाम) तैत्तिर इत्यादि ॥

गृहासक्ताः पक्षिमृगाश्छेकास्ते गृह्यकाश्च ते ॥ ४३ ॥

घरके पाले हुए मृगपक्षी आदिके नाम २-छेक १ गृह्यक २ ॥ ४३ ॥

इति सिंहादिवर्गः ॥ ५ ॥

अथ मनुष्यवर्गः ६.

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ॥

मनुष्यमात्रके नाम ६--मनुष्य १ मानुष २ मर्त्य ३ मनुज ४ मानव ५ नर ६ ॥

स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः ॥ १ ॥

मनुष्यजातिपुरुषके नाम ५--पुंस् १ पञ्चजन २ पुरुष ३ पूरुष ४ नृ ५ ॥ १ ॥

स्त्री योषिदबला योषा नारी सीमंतिनी-वधूः । प्रतीपदर्शिनी वामा वनिता महिला तथा ॥ २ ॥

स्त्रीके नाम ११--स्त्री १ योषित् २ अबला ३ योषा ४ नारी ५ सीमंतिनी ६ वधू ७ प्रतीपदर्शिनी ८ वामा ९ वनिता १० महिला ११ ॥ २ ॥

विशेषा—

स्त्रियोंके विशेषभेद कहते हैं ॥

—स्वङ्गना भीरुः कामिनी वामलोचना । प्रमदा मानिनी कान्ता ललना च नितम्बिनी ॥ ३ ॥ सुन्दरी रमणी रामा—

अच्छे अंगोंवाली स्त्रीका नाम १-अंगना १ ॥ डरभूत स्त्रीका नाम १-भीरु १ ॥ कामयुतस्त्रीका नाम १-कामिनी १ ॥ सुन्दरनेत्रोंवाली स्त्रीका नाम १-वामलोचना १ ॥ बहुत कामवती स्त्रीका नाम १-प्रमदा १ ॥ प्रणयकोपवाली स्त्रीका नाम

१-मानिनी १ ॥ मन हरनेवाली स्त्रीका नाम १-कान्ता १ ॥ दुलारी स्त्रीके नाम २—ललना १ नितम्बिनी २ ॥ ३ ॥ सुन्दर अंगोंवाली स्त्रीका नाम १-सुन्दरी १ ॥ जिसमें चित्तअतिरमित हो उस स्त्रीका नाम १—रमणी १ ॥ विहारके योग्य स्त्रीका नाम १—रामा १ ॥

—कोपना सैव भामिनी ।

कोपवाली स्त्रीके नाम २ कोपना १ भामिनी २॥

वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनी ॥ ४ ॥

बहुतही उत्तम स्त्रीके नाम ४ वरारोहा १ मत्तकाशिनी २ उत्तमा ३ वरवर्णिनी ४ ॥ ४ ॥

कृताभिषेका महिषी—

जिस रानीका अभिषेक हुआ हो उसका नाम १—महिषी १ ॥

भोगिन्योऽन्या नृपस्त्रियः ।

महिषीको छोड़ राजाकी अन्य स्त्रियोंका नाम १—भोगिनी १ ॥

पत्नी पाणिगृहीती च द्वितीया सहधर्मिणी ॥ ५ ॥ भार्या जायाथ पुंभूम्नि दाराः—

व्याही हुई स्त्रीके नाम ७—पत्नी १ पाणिगृहीती २ द्वितीया ३ सहधर्मिणी ४ ॥ ५ ॥ भार्या ५ जाया ६ दार पु०ब० ७ ॥

—स्यात्तु कुटुम्बिनी । पुरन्ध्री—

जिस स्त्रीके पतिपुत्र दोनों विद्यमान हों उसके नाम २—कुटुंबिनी १ पुरन्ध्री २ ॥

—सुचरित्रा तु सती साध्वी पतिव्रता ॥ ६ ॥

पतिव्रता स्त्रीके नाम ४—सुचरित्रा १ सती २ साध्वी ३ पतिव्रता ४ ॥ ६ ॥

कृतसापत्निकाप्यूढाधिविन्ना—

जिसके बहुतसी स्त्रियां हों उनमें जो प्रथम व्याही गयी हो उसके नाम ३—कृतसापत्निका १ अप्यूढा २ अधिविन्ना ३ ॥

—ऽथ स्वयंवरा । पतिंवरा च वर्या-

जो अपने आप स्वयंवरादिमें पतिकी इच्छा करे उस स्त्रीके नाम -३ स्वयंवरा १ पतिंवरा २ वर्या ३ ॥

—ऽथ कुलस्त्री कुलपालिका ॥ ७ ॥

कुलवती स्त्रीके नाम २-कुलस्त्री १ कुलपालिका २ ॥ ७ ॥

कन्या कुमारी—

पांच वर्षकी कन्याके नाम २-कन्या १ कुमारी २ ॥

—गौरी तु नग्निकाऽनागतार्तवा ।

दशवर्षकी कन्याके नाम ३-गौरी १ नग्निका २ अनागतार्तवा ३ ॥

स्यान्मध्यमा दृष्टरजा—

जिसको रजोधर्म्म हो जाय उस स्त्रीका नाम-१ मध्यमा १ ॥

—स्तरुणी युवतिः समे ॥ ८ ॥

युवा स्त्रीके नाम २-तरुणी १ युवती २ ॥८॥

समाः स्नुषाजनीवध्वः—

बहू (पुत्रवधू) के नाम ३-स्नुषा १ जनी २ वधू ३ ॥

—चिरण्टी तु सुवासिनी ।

जो कि किंचित् युवावस्थाको प्राप्त व्याही हुई निज पिताके घरमें रहती हो उस स्त्रीके नाम २-चिरण्टी १ सुवासिनी २ ॥

इच्छावती कामुका स्या—

जो धनादिकी इच्छा करती हो उस स्त्रीके नाम २-इच्छावती १ कामुका २ ॥

—वृषस्यन्ती तु कामुकी ॥ ९ ॥

मैथुनकी इच्छा करनेवाली स्त्रीके नाम २—वृषस्यन्ती १ कामुकी २ ॥ ९ ॥

कान्तार्थिनी तु सा याति संकेतं साऽभिसारिका ।

जो पतिकी इच्छा कर कामार्त्त हो संकेत स्थान को जावे उस स्त्रीका नाम १-अभिसारिका १ ॥

पुंश्चली धर्षिणी बन्धक्यसती कुलटेत्वरी ॥ १० ॥ स्वैरिणी पांशुला च स्या--

व्यभिचारिणी स्त्रीके नाम ८-पुंश्चली १ धर्षिणी २ बन्धकी ३ असती ४ कुलटा ५ इत्वरी ६ ॥ १० स्वैरिणी ७ पांसुला ८ ॥

दशिश्वी शिशुना विना ।

विना पुत्रवाली स्त्रीका नाम १-अशिश्वी १ ॥

अवीरा निष्पतिसुता—

जिसके पति पुत्र न हों उस स्त्रीका नाम १—अवीरा १ ॥

—विश्वस्ताविधवे समे ॥ ११ ॥

विधवा स्त्रीके नाम २—विश्वस्ता १ विधवा २ ॥ ११ ॥

आलिः सखी वयस्याथ-

सखी वा साथ खेलनेवाली स्त्रीके नाम ३-आलि १ सखी २ वयस्या ३ ॥

-पतिवत्नी सभर्तृका ।

जिस स्त्रीका पति जीता हो उसके नाम २-पतिवत्नी १ समर्तृका २ ॥

वृद्धा पलिक्नी-

बूढ़ी स्त्रीके नाम २-वृद्धा १ पलिक्नी २ ॥

-प्राज्ञी तु प्रज्ञा-

कुछ-कुछ समझदार स्त्रीके नाम २-प्राज्ञी १ प्रज्ञा २ ॥

-प्राज्ञा तु धीमती ॥ १२ ॥

अति बुद्धिमती स्त्रीके नाम २—प्राज्ञा १ धीमती २ ॥ १२ ॥

शूद्री शूद्रस्य भार्या स्या—

चाहे अन्य जाति भी हो पर शूद्रकी स्त्री हो उस स्त्रीका नाम १-शूद्री १ ॥

-च्छूद्रा तज्जात्रिरेश च ॥

शूद्रजातिका नाम १-शूद्रा १ ॥

आभीरी तु महाशूद्री जातिपुंयोगयो समा ॥ १३ ॥

अहिरिनिके नाम ३-आभीरी १ महाशूद्री २ ॥ १३ ॥

अर्याणी स्वयमर्या स्यात् -

बनैनीके नाम २-अर्याणी १ अर्या २ ॥

—क्षत्रिया क्षत्रियाण्यपि ।

क्षत्रियानीके नाम २-क्षत्रिया १ क्षत्रियाणी २॥

उपाध्यायाप्युपाध्यायी-

पंडितानीके नाम २-उपाध्याया १ उपाध्यायी २ ॥

-स्यादाचार्यापि च स्वतः ॥ १४ ॥

जो अपने अपने आप मंत्रोंके अर्थ कह सके उसका नाम १-आचार्य्या १ ॥ १४ ॥

आचार्यानी तु पुंयोगे-

चाहे मंत्रादिकी व्याख्या न कर सके पर आचार्यकी स्त्री हो उसका नाम १-आचार्य्यानी १।

-स्यादर्यी

वैसे ही अर्य (वैश्य) की स्त्रीका नाम १—अर्यी १ ॥

-क्षत्रियी तथा ।

क्षत्रियकी स्त्रीका नाम १-क्षत्रिणी १ ॥

उपाध्यायान्युपाध्यायी-

पढ़ानेवाली स्त्रीके इसी प्रकारके नाम २-उपाध्यायानी १ उपाध्यायी २ ॥

-पोटा स्त्री पुंसलक्षणा ॥ १५ ॥

डाढ़ी मूछ आदियुक्त स्त्रीका नाम १-पोटा १ ॥ १५ ॥

वीरपत्नी वीरभार्या

वीरकी स्त्रीके नाम २-वीरपत्नी १ वीरभार्या २॥

—वीरमाता तु वीरसूः ।

वीरकी माताके नाम २-वीरमातृ १ वीरसू २ ॥

जातापत्या प्रजाता च प्रसूता च प्रसूतिका ॥ १६ ॥

जिनके बालक पैदा हुआ हो उस स्त्रीके नाम ४-जातापत्या १ प्रजाता २ प्रसूता ३ प्रसूतिका ४ ॥ १६ ॥

स्त्री नग्निका कोटवी स्याद्—

नङ्गी स्त्रीके नाम २—नग्निका १ कोटवी २ ॥

—दूती सञ्चारिके समे ।

दूतीके नाम २-दूती १ संचारिका २ ॥

कात्यायन्यर्धवृद्धा या काषायवसनाऽथवा ॥ १७ ॥

गेरू आदिसे रँगे हुए वस्त्र पहरनेवाली कुछ वृद्ध विधवा स्त्रीका नाम १-कात्यायनी १ ॥ १७॥

सैरन्ध्री परवेश्मस्था स्ववशा शिल्पकारिका ॥

अपनी इच्छाके अनुसार पराये गृहमें रहकर शिल्पकार्य करनेवाली स्त्रीका नाम १-सैरन्ध्री १ ॥

असिक्नी स्यादवृद्धा या प्रेष्याऽन्तःपुरचारिणी ॥ १८ ॥

घरके भीतर सेवा आदि कार्य करनेवाली जवान स्त्रीका नाम १-असिक्नी १ ॥ १८ ॥

वारस्त्री गणिका वेश्या रूपाजीवा—

वेश्याके नाम ४—वारस्त्री १ गणिका २ वेश्या ३ रूपाजीवा ४ ॥

—ऽथ सा जनैः । सत्कृता वारमुख्या स्यात—

जिसका पुरुष अधिक सत्कार करे अर्थात् सबमें श्रेष्ठ वेश्याका नाम १-वारमुख्या १ ॥

कुट्टनी शम्भली समे ॥ १९ ॥

कुटनीके नाम २-कुट्टनी १ शम्भली २ ॥१९॥

विप्रश्निका त्वीक्षणिका दैवज्ञा—

सामुद्रिक आदि शास्त्रानुसार लक्षण जानकर शुभाशुभ फल कहनेवाली स्त्रीके नाम ३-विप्रश्निका १ ईक्षणिका २ दैवज्ञा ३ ॥

ऽथ रजस्वला । स्त्रीधर्मिण्यवितात्रेयी मलिनी पुष्पवत्यपि ॥२०॥ ऋतुमत्युदक्यापि—

रजस्वला स्त्रीके नाम ८-रजस्वला १ स्त्रीधर्मिणी २ अवि ३ आत्रेयी ४ मलिनी ५ पुष्पवती ६ ॥२० ऋतुमती ७ उदक्या ८ ॥

—स्याद्रजः पुष्पमार्तवम् ।

स्त्रीके मासिक रजोधर्मके नाम ३-रजस् १ पुष्प २ आर्तव ३ ॥

श्रद्धालुर्दोहदवती—

गर्भके समय अनेक प्रकारकी इच्छा करनेवाली स्त्रीके नाम २-श्रद्धालु १ दोहदवती २ ॥

—निष्कला विगतार्तवा ॥ २१ ॥

रजोहीन स्त्रीके नाम २-निष्कला १ विगतार्तवा २ ॥ २१ ॥

आपन्नसत्त्वा स्यादगुर्विण्यन्तर्वत्नी च गर्भिणी ।

गर्भवाली स्त्रीके नाम ४-आपन्नसत्त्वा १ गुर्विणी २ अन्तर्वत्नी ३ गर्भिणी ४ ॥

गणिकादेस्तु गाणिक्यं गार्भिणं यौवतं गणे ॥ २२ ॥

वेश्याओंके समूहका नाम १ गाणिक्य १ ॥ गर्भिणियोंके समूहका नाम १-गार्भिण १ ॥ युवतियोंके समूहका नाम १-यौवत १ ॥ २२ ॥

पुनर्भूर्दिधिषूरूढा द्वि—

जिस स्त्रीका विवाहसंस्कार द्वितीयवार हो उस स्त्रीके नाम २-पुनर्भू १ दिधिषू २ ॥

—स्तस्या दिधिषुः पतिः ।

उसके पतिका नाम १-दिधिषु १।

स तु द्विजोऽग्रेदिधिषूः सैव यस्य कुटुम्बिनी ॥ २३ ॥

जिसका द्वितीयवार विवाहसंस्कार हो वह स्त्री और उसका पति उन दोनोंसे उत्पन्न बालकका नाम १-अग्रेदिधिषू १ ॥ २३ ॥

कानीनः कन्यकाजातः सुतो—

कन्यासे उत्पन्न हुए पुत्रके नाम २- कानीन १ कन्यकाजात २ ॥

ऽथ सुभगासुतः । सौभागिनेयः—

सौभाग्यवती स्त्रीके पुत्रके नाम २- सुभगासुत १ सौभागिनेय २ ॥

—स्यात्पारस्त्रैणेयस्तु परस्त्रियाः ॥ २४ ॥

परस्त्रीके पुत्रका नाम १-पारस्त्रैणेय १ ॥ २४ ॥

पैतृष्वसेयः स्यात्पैतृष्वस्त्रीयश्च पितृष्वसुः । सुतो—

पिताकी बहन अर्थात् बुवाके पुत्रके नाम २- पैतृष्वसेय १ पैतृष्वस्त्रीय २ ॥

—मातृष्वसुश्चैवं—

मौसीके पुत्रके नाम २-मातृष्वसेय १ मातृष्वस्त्रीय २ ॥

वैमात्रेयो विमातृजः ॥ २५ ॥

सौतेले भाईके नाम २-वैमात्रेय १ विमातृज २ ॥ २५ ॥

अथ बान्धकिनेयः स्याद्बन्धुलश्चासतीसुतः । कौलटेरः कौलटेयो—

कुलटाके पुत्रके नाम ५-बान्धकिनेय १ बन्धुल २ असतीसुत ३ कौलटेर ४ कौलटेय ५ ॥

भिक्षुकी तु सती यदि ॥ २६ ॥ तदा कौलटिनेयोऽस्याः कौलटेयोऽपि चात्मजः ।

जो सती भिक्षाके निमित्त घरोंमें फिरे ॥ २६ ॥ उसके पुत्रके नाम २- कौलटिनेय १ कौलटेय २ ॥

आत्मजस्तनयः सूनुः सुतः पुत्रः—

पुत्रके नाम ५-आत्मज १ तनय २ सूनु ३ सुत ४ पुत्र ५ ॥

स्त्रियां त्वमी ॥ २७ ॥ आहुर्दुहितरं सर्व—

जो पुत्रके नाम स्त्रीलिंगमें हों तो पुत्रीके नाम हो जाते हैं ॥ २७ ॥

—ऽपत्यं तोकं तयोः समे ।

पुत्र पुत्री साधारणके नाम २- अपत्य १ तोक २ ॥

स्वजाते त्वौरसौरस्यौ—

सगे पुत्रके नाम २-औरस १ उरस्य २ ॥

—तातस्तु जनकः पिता ॥ २८ ॥

पिताके नाम ३-तात १ जनक २ पिता ३ ॥ २८ ॥

जनयित्री प्रसूर्माता जननी—

माताके नाम ४-जनयित्री १ प्रसू २ मातृ ३ जननी ४ ॥

भगिनी स्वसा ।

बहिनके नाम २-भगिनी १ स्वसृ २ ॥

ननान्दा तु स्वसा पत्युः—

ननन्दका नाम १-ननान्दृ १ ॥

नप्त्री पौत्री सुतात्मजा ॥ २९ ॥

नातिनिके नाम ३-नप्त्री १ पौत्री २ सुतात्मजा ३ ॥ २९ ॥

भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परम् ।

आपसमें भ्रातृवर्गकी स्त्रियोंका नाम १-यातृ १॥

प्रजावती भ्रातृजाया—

भौजाईके नाम २-प्रजावती १ भ्रातृजाया २ ॥

मातुलानी तु मातुली ॥ ३० ॥

मामीके नाम २-मातुलानी १ मातुली २ ॥ ३० ॥

पतिपत्न्योः प्रसूः श्वश्रूः—

पति और स्त्रीकी माताका नाम १- श्वश्रू १ ॥

श्वशुरस्तु पिता तयोः ।

पति और स्त्रीके पिताका नाम१-श्वशुर १ ॥

पितुर्भ्राता पितृव्यः स्या—

चाचा या ताऊका नाम १-पितृव्य १ ॥

—न्मातुर्भ्राता च मातुलः ॥ ३१ ॥

मामाके नाम २-मातुर्भ्रातृ १ मातुल २ ॥३१॥

श्यालाः स्युर्भ्रातरः पत्न्याः—

शालेका नाम १-श्याल १ ॥

—स्वामिनो देवृदेवरौ ।

देवरके नाम २-देवृ १ देवर २ ॥

स्वस्त्रीयो भागिनेयः स्या—

भानजेके नाम २-स्वस्त्रीय १ भागिनेय २ ॥

ज्जामाता दुहितुः पतिः ॥ ३२ ॥

जमाईके नाम १-जामातृ १ ॥ ३२ ॥

पितामहः पितृपिता—

दादाके नाम २-पितामह १ पितृपितृ २ ॥

—तत्पिता प्रपितामहः ।

परदादाका नाम १-प्रपितामह १ ॥

मातुर्मातामहाद्येवं—

इस प्रकार (नानाका नाम) मातामह (पर-नानाका) प्रमातामह ॥

सपिण्डास्तु सनाभयः ॥ ३३ ॥

सपिण्डके नाम २—सपिण्ड १ सनाभि २ ॥ ३३ ॥

समानोदर्यसोदर्यसगर्भ्यसहजाःसमाः ।

सगे भाईके नाम ४—समानोदर्य १ सोदर्य २ सगर्भ्य ३ सहज ४ ॥

सगोत्रबान्धवज्ञातिबन्धुस्वस्वजनाः समाः ॥ ३४ ॥

एक गोत्रवालोंके अर्थात् समगोत्रियोंके नाम ६-सगोत्र १ बान्धव २ ज्ञाति ३ बन्धु ४ स्व ५ स्वजन ६ ॥ ३४ ॥

ज्ञातेर्यं बन्धुता तेषां क्रमाद्भावसमूहयोः ।

बिरादरीके भावका नाम १-ज्ञातेय १ ॥ परिवारके समूहका नाम १-बन्धुता १ ॥

धवः प्रियः पतिर्भर्ता—

पतिके नाम ४-धव १ प्रिय २ पति ३ भर्तृ ४ ॥

—जारस्तूपपतिः समौ ॥ ३५ ॥

जिसके साथ ब्याही हो उससे अतिरिक्त अन्य से मैथुन करती हो तो उस पतिके नाम २-जार १ उपपति २ ॥ ३५ ॥

अमृते जारजः कुण्डो—

अपने पतिके जीते ही अन्य पतिसे जो पुत्र हो उसका नाम १-कुण्ड १ ॥

मृते भर्तरि गोलकः ।

जो पतिके मरनेपर अन्य पतिसे उत्पन्न हो उसका नाम १-गोलक १ ॥

भ्रात्रीयो भ्रातृजो—

भतीजेके नाम २-भ्रात्रीय १ भ्रातृज २ ॥

—भ्रातृभगिन्यौ भ्रातरावुभौ ॥३६॥

बहिनभाईके नाम २-भ्रातृभगिनी (न्यौ) १ भ्रातृ (तरौ) २ ॥ ३६ ॥

मातापितरौ पितरौ मातरपितरौ प्रसूजनयितारौ ।

जहां मातापिताको साथ ही कहना हो उसके नाम ४-मातापितृ (तरौ) १ पितृ (तरौ) २ मातरपितृ (तरौ) ३ प्रसूजनयितृ (तारौ) ४ ॥

श्वश्रूश्वशुरौ श्वशुरौ—

ऐसे ही सासु ससुरके नाम २-श्वश्रूश्वशुर (रौ) १ श्वशुर (रौ) २ ॥

—पुत्रौ पुत्रश्च दुहिता च ॥ ३७ ॥

इसी प्रकार कन्यापुत्रका नाम १-पुत्र (त्रौ) १ ॥ ३७ ॥

दंपती जंपती जायापती भार्यापती च तौ ।

स्त्रीपुरुषके इकट्ठे नाम ४-दम्पति (ती) १ जम्पति (ती) २ जायापति (ती) ३ भार्यापति (ती) ४ ॥

गर्भाशयो जरायुः स्या—

गर्भस्थानके नाम २--गर्भाशय १ जरायु २ ॥

—दुल्बं च कललोऽस्त्रियाम् ॥ ३८ ॥

गर्भबन्धनके नाम २--उल्ब १ कलल २ ॥३८॥

सूतिमासो वैजननो—

गर्भ रहनेसे नवमें वा दशमें मासके नाम जिसमें बालक पैदा होता है २-सूतिमास १ वैजनन २ ॥

—गर्भो भ्रूण इमौ समौ ।

गर्भके नाम २--गर्भ १ भ्रूण २ ॥

तृतीयाप्रकृतिः षण्ढः क्लीबः षण्डो नपुंसके ॥ ३९ ॥

हीजडेके नाम ५--तृतीयाप्रकृति १ षण्ढ २ क्लीब ३ षण्ड ४ नपुंसक ५ ॥ ३९ ॥

शिशुत्वं शैशवं बाल्यं—

लड़कपनके नाम ३--शिशुत्व १ शैशव २ बाल्य ३ ॥

तारुण्यं यौवनं समे ।

यौवनके नाम २--तारुण्य १ यौवन २ ॥

स्यात्स्थाविरं तु वृद्धत्वं—

बुढ़ापेके नाम २--स्थाविर १ वृद्धत्व २ ॥

वृद्धसंघेऽपि वार्धकम् ॥ ४० ॥

बूढ़ोंके समूहका नाम १--वार्धक १ ॥ ४० ॥

पलितं जरसा शौक्ल्यं केशादौ—

अतिबुढ़ापेमें केश आदिकमें जरा करके जो सफेदी आती है उसका नाम १--पलित १ ॥

—विस्रसा जरा ।

बुढ़ाईके नाम २--विस्रसा १ जरा २ ॥

स्यादुत्तानशया डिम्भा स्तनपा च स्तनंधयी ॥ ४१ ॥

दूधपिई छोटी लड़कीके नाम ४—उत्तानशया १ डिम्भा २ स्तनपा ३ स्तनन्धयी ४ ॥ ४१ ॥

बालस्तु स्यान्माणवको—

सोलह वर्षपर्यन्त लड़केके नाम २— बाल १ माणवक २ ॥

—वयःस्थस्तरुणो युवा ।

जवान पुरुषके नाम ३—वयःस्थ १ तरुण २ युवन् ३ ॥

प्रवयाः स्थविरो वृद्धो जीनो जीर्णो जरन्नपि ॥ ४२ ॥

बूढ़ेके नाम ६—प्रवयस् १ स्थविर २ वृद्ध ३ जीन ४ जीर्ण ५ जरत् ६ ॥ ४२ ॥

वर्षीयान्दशमी ज्यायान्—

अतिबूढ़ेके नाम ३—वर्षीयस् १ दशमिन् २ ज्यायस् ३ ॥

पूर्वजस्त्वग्रियोऽग्रजः ।

ज्येष्ठ भाईके नाम ३—पूर्वज १ अग्रिय २ अग्रज २ ॥

जघन्यजे स्युः कनिष्ठयवीयोऽवरजानुजाः ॥ ४३ ॥

छोटे भाईके नाम ५—जघन्यज १ कनिष्ठ २ यवीयस् ३ अवरज ४ अनुज ५ ॥ ४३ ॥

अमांसो दुर्बलश्छातो—

दुबलेके नाम ३-अमांस १ दुर्बल २ छात ३ ॥

—बलवान्मांसलोऽसलः ।

बलवान्के नाम ३—बलवत् १ मांसल २ असल ३ ॥

तुन्दिलस्तुन्दिभस्तुन्दी बृहत्कुक्षिः पिचण्डिलः ॥ ४४ ॥

बड़े पेटवालेके नाम ५—तुंदिल १ तुंदिभ २ तुंदिन् ३ बृहत्कुक्षि ४ पिचण्डिल ५ ॥ ४४ ॥

अवटीटोऽवनाटश्चावभ्रटो नतनासिके ।

चपटी नाकवालेके नाम ३—अवटीट १ अवनाट २ अवभ्रट ३ ॥

केशवः केशिकः केशी—

अच्छे बालवालोंके नाम ३—केशव १ केशिक २ केशिन् ३ ॥

—वलिनो वलिभः समौ ॥ ४५ ॥

जिसकी बुढ़ापेके मारे खाल सिकुड़ गयी हो उसके नाम २— वलिन १ वलिभ २ ॥४५॥

विकलांगस्त्वपोगण्डः—

जिसका अपनेहीसे कोई अंग अधिक वा कम हो उसके नाम २-विकलांग १ अपोगण्ड ॥ २ ॥

—खर्वो ह्रस्वश्च वामनः ।

बौनेके नाम ३-खर्व १ ह्रस्व २ वामन ३ ॥

खरणाः स्यात्खरणसो—

जिसकी तीखी नाक हो उसके नाम २-खरणस् १ खरणस २ ॥

विग्रस्तु गतनासिकः ॥ ४६ ॥

नकटेके नाम २-विग्र १ गतनासिक २ ॥४६॥

खुरणाः स्यात्खुरणसः—

जिसकी पशुके खुरके सदृश नासिका हो उसके नाम २-खुरणस् १ खुरणस ॥ २ ॥

प्रञ्जुः प्रगतजानुकः ।

वातआदि रोगसे जिसके घुटने बहुत दूर दूर हो गये हों उसके नाम २-प्रञ्जु १ प्रगतजानुक २ ॥

ऊर्ध्वञ्जुरूर्ध्वजानुः स्यात—

जिसके घुटने ऊंचे हों उसके नाम २- ऊर्ध्वञ्जु १ ऊर्ध्वजानु २ ॥

—संञ्जुः संहतजानुकः ॥ ४७ ॥

जिसके घुटने मिले हुए हों उसके नाम२-संञ्जु१ संहतजानुक २ ॥४७॥

स्यादेडे बधिरः—

बहिरेके नाम २—एड १ बधिर २

—कुब्जे गडुलः—

कुबड़ेके नाम २—कुब्ज १ गडुल २ ॥

—कुकरे कुणिः ।

जिसके हाथमें रोगादिसे कुछ विकार हो उसके नाम २-कुकर १ कुणि २ ॥

पृश्निरल्पतनौ—

जिसका बहुत ही छोटा शरीर हो उसके नाम २-पृश्नि १ अल्पतनु २ ॥

श्रोणः पंगौ—

लूलेके नाम२-श्रोण १ पंगु २ ॥

—मुण्डस्तु मुण्डिते ॥ ४८ ॥

जिसका शिर मूँड़ा हुआ हो उसके नाम२-मुण्ड १ मुण्डित २ ॥ ४८ ॥

बलिरः केकरे—

भेंड़ (जिसके नेत्रकी पुतली फिरती हों)उसके नाम२-बलिर १ केकर २ ॥

—खोडे खञ्ज—

लँगड़ेके नाम २-खोड १ खञ्ज २ ॥

—स्त्रिषु जरावराः । जडुलः कालकः पिप्लु—

जिसके अंगमें लशुनाकारका चिह्न हो उसके नाम ३-जडुल १ कालक २ पिप्लु ३ ॥

—स्तिलकस्तिलकालकः ॥ ४९ ॥

देहके तिलके नाम २—तिलक १ तिलकालक २ ॥ ४९ ॥

अनामयं स्यादारोग्यं—

विना रोगके नाम २-अनामय १ आरोग्य२ ॥

—चिकित्सा रुक्प्रतिक्रिया ।

इलाज करनेके नाम २-चिकित्सा १ रुग्प्रतिक्रिया २ ॥

भेषजौषधभैषज्यान्यगदो जायुरित्यपि ॥ ५० ॥

औषधके नाम ५-भेषज १ औषध २ भैषज्य ३ अगद ४ जायु ५ ॥ ५० ॥

स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः ।

रोगके नाम ७-रुज् १ रुजा २ उपताप ३ रोग ४ व्याधि ५ गद ६ आमय ७ ॥

क्षयः शोषश्च यक्ष्मा च—

क्षय रोगके नाम ३-क्षय १ शोष २ यक्ष्मन् ३॥

—प्रतिश्यायस्तु पीनसः ॥ ५१ ॥

पीनसरोगके नाम २-प्रतिश्याय १ पीनस २ ॥ ५१ ॥

स्त्री क्षुत्क्षुतं क्षवः पुंसि—

छींकके नाम ३-क्षुत् १ क्षुत २ क्षव ३ ।

—कासस्तु क्षवथुः पुमान्—

खांसीके नाम २-कास १ क्षवथु २ ।

शोफस्तु श्वयथुः शोथः—

सूजनके नाम ३-शोफ १ श्वयथु २ शोथ ३ ॥

—पादस्फोटो विपादिका ॥ ५२ ॥

बिवायी रोगके नाम २-पादस्फोट १ विपादिका २ ॥ ५२ ॥

किलाससिध्मे—

सेहुवां (सीप) के नाम २- किलास १ सिध्म २॥

कच्छूर्वा तु पामपामे विचर्चिका ।

खाजुरोगके नाम ४-कच्छू १ पामन् २ पामा ३ विचर्चिका ४ ॥

कण्डूः खर्जूश्च कण्डूया—

खुजलीके नाम ३-कण्डू १ खर्जू २ कण्डूया ३।

—विस्फोटः पिटकोऽस्त्रियाम् ॥ ५३ ॥

फोड़ेके नाम २-विस्फोट १ पिटक २ ॥ ५३ ॥

व्रणोऽस्त्रियामीर्मरुः क्लीबे—

घावके नाम ३-व्रण १ ईर्म्म २ अरुस् ३ ॥

नाडीव्रणः पुमान् ।

नासूरका नाम १-नाडीव्रण १ ॥

कोठो मण्डलकं—

जो गोल उज्ज्वल चन्दे पड़ जाते हैं उस कोढ़के नाम २--कोठ १ मण्डलक २ ॥

—कुष्ठश्वित्रे—

छाजनके नाम २--कुष्ठ १ श्वित्र २ ॥

दुर्नामकार्शसी ॥ ५४ ॥

बवासीरके नाम २--दुर्नामक १ अर्शस् २ ॥ ५४ ॥

आनाहस्तु विबन्धः स्याद्—

कजई जिसमें मलमूत्र रुक जाय उस रोगके नाम २--आनाह १ विबन्ध २ ॥

—ग्रहणी रुक्प्रवाहिका ।

संग्रहणी रोगके नाम २--ग्रहणी १ प्रवाहिका २।

प्रच्छर्दिका वमिश्च स्त्री पुमांस्तु वमथुः समाः ॥५५॥

उलटी अर्थात् वमनके नाम ३--प्रच्छर्दिका १ वमि २ वमथु ३ ॥ ५५ ॥

व्याधिभेदा विद्रधिः स्त्री ज्वरमेहभगन्दराः ।

व्यरथिया (एक प्रकारका फोड़ा) का नाम १--विद्रधि १ ॥ ज्वरका नाम १--ज्वर १ ॥ प्रमेहका नाम १--मेह १ ॥ भगन्दर अर्थात् गुदसमीपके फोड़ेका नाम १--भगन्दर १ ॥

अश्मरी मूत्रकृच्छ्रं स्यात्—

कंकरोग अर्थात् पथरीरोगके नाम २ --अश्मरी १ मूत्रकृच्छ्र २ ॥

—पूर्वे शुक्रावधेस्त्रिषु ॥ ५६ ॥

यहांसे लेकर शुक्रशब्दके पहलेके शब्द तीनों लिंगोंमें होते हैं ॥ ५६ ॥

रोगहार्यगदंकारो भिषग्वैद्यो चिकित्सकः ॥

वैद्यके नाम ५--रोगहारिन् १ अगदंकार २ भिषज् ३ वैद्य ४ चिकित्सक ५ ॥

वार्त्तो निरामयः कल्य उल्लाघो निर्गतो गदात् ॥ ५७ ॥

रोगरहितके नाम ४--वार्त १ निरामय २ कल्य ३ उल्लाघ ४ ॥ ५७ ॥

ग्लानग्लास्नू--

रोगवशसे क्षीण हो जानेवालेके नाम २--ग्लान १ ग्लास्नु २ ॥

--आमयावी विकृतो व्याधितोऽपटुः । आतुरोऽभ्यमितोऽभ्यान्तः—

रोगीके नाम ७--आमयाविन् १ विकृत २ व्याधित ३ अपटु ४ आतुर ५ अभ्यमित ६ अभ्यान्त ७ ॥

—समौ पामनकच्छुरौ ॥ ५८ ॥

खुजलीवालेके नाम २---पामन १ कच्छुर २ ॥ ५८ ॥

—दद्रुणो दद्रुरोगी स्या—

दद्रुरोगके नाम २--दद्रुण १ दद्रुरोगिन् २ ॥

—दर्शोरोगयुतोऽर्शसः ।

बवासीररोगीका नाम १--अर्शस् १ ॥

वातकी वातरोगी स्यात्—

वातरोगीके नाम २--वातकिन् १ वातरोगिन् २।

—सातिसारोऽतिसारकी ॥ ५९ ॥

जिसको बहुत दस्त हों उसके नाम२-सातिसार १ अतिसारकिन् २ ॥ ५९ ॥

स्युः क्लिन्नाक्षे चुल्लचिल्लपिल्लाः क्लिन्नेऽक्षिणि चाप्यमी ।

चुन्धेके नाम ४--क्लिन्नाक्ष १ चुल्ल २ चिल्ल ३ पिल्ल ४ ॥

उन्मत्त उन्मादवति—

उन्मत्त अर्थात् बावलेके नाम २--उन्मत्त १ उन्मादवत् २ ॥

—श्लेष्मलः श्लेष्मणः कफी ॥ ६० ॥

कफरोगवालेके नाम ३--श्लेष्मल १ श्लेष्मण २ कफिन् ३ ॥ ६० ॥

न्युब्जो भुग्ने रुजा—

कुबड़ेका नाम १-न्युब्ज १ ॥

वृद्धनाभौ तुन्दिलतुन्दिभौ ।

जिसकी वातरोगसे नाभि बढ़ जाय उसके नाम ३-वृद्धनाभि १ तुन्दिल २ तुन्दिभ ३ ॥

किलासी सिध्मलो—

किलास (सौंप्) रोगीके नाम २-किलासिन् १ सिध्मल २ ॥

—ऽन्धोऽदृक्—

अन्धेके नाम २-अन्ध १ अदृश् २ ॥

—मूर्छाले मूर्तमूर्छितौ ॥ ६१ ॥

बेहोशवालेके नाम ३-मूर्च्छाल १ मूर्त २ मूर्छित ३ ॥ ६१ ॥

शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि च ।

धातुके नाम ६-शुक्र १ तेजस् २ रेतस् ३ बीज ४ वीर्य ५ इंद्रिय ६ ॥

मायुः पित्तं

पित्तके नाम २-मायु १ पित्त २ ॥

—कफःश्लेष्मा—

कफके नाम २-कफ १ श्लेष्मन् २ ॥

स्त्रियां तु त्वगसृग्धरा ॥ ६२ ॥

खालके नाम २-त्वच् १ असृग्धरा २ ॥ ६२ ॥

पिशितं तरसं मांसं पललं क्रव्यमामिषम् ।

मांसके नाम ६-पिशित १ तरस २ मांस ३ पलल ४ क्रव्य ५ आमिष ६ ॥

उत्तमं शुष्कमांसं स्यान्नद्वल्लूरं त्रिलिङ्गकम् ॥ ६३ ॥

सूखे मांसके नाम ३-उत्तम १ शुष्कमांस २ वल्लूर ३ ॥ ६३ ॥

रुधिरेऽसृग्लोहितास्रक्तक्षतजशोणितम्

रुधिरके नाम ७-रुधिर १ असृज् २ लोहित ३ अस्र ४ रक्त ५ क्षतज ६ शोणित ७ ॥

वुक्काग्रमांसं—

कलेजेके नाम २-वुक्का १ अग्रमांस २ ॥

—हृदयं हृ-

हृदयके नाम २-हृदय १ हृद् २ ॥

—न्मेदस्तु वपा वसा ॥ ६४॥

चरबीके नाम ३-मेदस् १ वपा २ वसा ३ ॥ ६४ ॥

पश्चाद्ग्रीवाशिरा मन्या-

गलेके पीछेकी नसका नाम १-मन्या १ ॥

-नाडी तु धमनिः शिरा ।

नाड़ीके नाम ३-नाडी १ धमनि २ शिरा ३ ॥

तिलकं क्लोम—

शरीरके तिलके नाम २-तिलक १ क्लोमन् २॥

मस्तिष्कं गोर्द—

गुर्देके नाम २-मस्तिष्क १ गोर्द २ ॥

—किट्टं मलोऽस्त्रियाम् ॥ ६५ ॥

मैलके नाम २-किट्ट १ मल २ ॥ ६५ ॥

अन्त्रं पुरीतद्—

आंतोंके नाम २-अन्त्र १ पुरीतत् २ ॥

—गुल्मस्तु प्लीहा पुं-

पलैया (तिल्ली) रोगके नाम २-गुल्म १ प्लीहन् २ ॥

—स्यथ वस्नसा । स्नायुः स्त्रियां--

नसके नाम २-वस्नसा १ स्नायु २ ॥

-कालखण्ड यकृती तु समे इमे ॥६६॥

पेटमें जो दहिनी ओर बटिया हो उसके नाम २-कालखण्ड १ यकृत् २ ॥ ६६ ॥

सृणिका स्यन्दिनी लाला-

लारके नाम ३-सृणिका १ स्यन्दिनी २ लाला ३ ॥

दूषिका नेत्रयोर्मलम् ।

कीचड़ (गीड़) का नाम १—दूषिका १ ॥

मूत्रं प्रस्राव-

मूतके नाम २—मूत्र १ प्रस्राव २ ॥

-उच्चारावस्करौ शमलं शकृत ॥ ६७ ॥ पुरीषं गूथवर्चस्कमस्त्री विष्ठाविशौ स्त्रियौ।

विष्ठाके नाम ९—उच्चार १ अवस्कर २ शमल ३ शकृत् ४ ॥ ६७ ॥ पुरीष ५ गूथ ६ वर्चस्क ७ विष्ठा ८ विश् ९ ॥

स्यात्कर्परः कपालोऽस्त्री-

कपालके नाम २-कर्पर १ कपाल २ ॥

-कीकसं कुल्यमस्थि च ॥ ६८ ॥

हड्डीके नाम ३—कीकस १ कुल्य २ अस्थि ३ ॥ ६८ ॥

स्याच्छरीरास्थि कंकालः-

खांकरका नाम १—कंकाल १ ॥

—पृष्ठास्थि तु कशेरुका ।

पीठकी हड्डीका नाम १—कशेरुका १ ॥

शिरोस्थनि करोटिः स्त्री—

खोपड़ीका नाम १-करोटि १ ॥

-पार्श्वास्थनि तु पर्शुका ॥६९॥

पँसलीका नाम १-पर्शुका १ ॥ ६९ ॥

अङ्गं प्रतीकोऽवयवोऽपघनो-

अङ्गके नाम ४-अंग १ प्रतीक २ अवयव ३ अपघन ४ ॥

—ऽथ कलेवरम् । गात्रं वपुः संहननं शरीरं वर्म विग्रहः ॥ ७० ॥ कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ।

देहके नाम १२-कलेवर १ गात्र २ वपुस् ३ संहनन ४ शरीर ५ वर्मन् ६ विग्रह ७ ॥ ७० ॥ काय ८ देह ९ मूर्ति १० तनु ११ तनू १२ ॥

पादाग्रं प्रपदं—

पांवके आगेके नाम २-पादाग्र १ प्रपद २ ॥

—पादः पदंघ्रिश्चरणोऽस्त्रियाम् ७१ ॥

पांवके नाम ४-पाद १ पद् २ अंघ्रि ३ चरण ४ ॥ ७१ ॥

तद्ग्रन्थी घुटिके गुल्फौ—

टांकनोंके नाम २--घुटिका १ गुल्फ २

—पुमान्पार्ष्णिस्तयोरधः ।

एड़ीका नाम १--पार्ष्णि १ ॥

जंघा तु प्रसृता—

जंघा (पींडी) के नाम २--जंघा १प्रसृता २ ॥

—जानूरुपर्वाष्ठीवदस्त्रियाम् । ७२ ॥

जानुके नाम ३--जानु १ ऊरुपर्वन् २ अष्ठीवत् ३ ॥ ७२ ॥

सक्थि क्लीबे पुमानूरु—

निरोहके नाम २-सक्थि १ ऊरु २ ॥

स्तत्सन्धिः पुंसि वंक्षणः ।

टिहुनीका नाम १-वंक्षण १ ॥

गुदं त्वपानं पायुर्ना—

गुदाके नाम ३-गुद १ अपान २ पायु ३ ॥

—वस्तिर्नाभिरधो द्वयोः ॥ ७३ ॥

जहां मूत्र रहता है अर्थात् पेडूका नाम १-वस्ति १ ॥ ७३ ॥

कटो ना श्रोणिफलकं—

कमरके दोनों बगलके नाम ३-कट १ श्रोणि २ फलक ३ ॥

—कटिः श्रोणिः ककुद्मती ।

कमरके नाम ३-कटि १ श्रोणि २ ककुद्मती ॥

पश्चान्नितम्बः स्त्रीकट्याः—

स्त्रीके चूतड़का नाम १-नितम्ब १ ॥

—क्लीबे तु जघनं पुरः ॥ ७४ ॥

स्त्रीके जांघका नाम १-जघन १ ॥ ७४ ॥

कूपकौ तु नितम्बस्थौ द्वयहीने कुकुन्दरे ।

नितम्ब में जो दो गड्ढे होते हैं उनका नाम १-ककुन्दर १ ॥

स्त्रियां स्फिचौ कटिप्रोथा—

कूलेके नाम२-स्फिच् १ कटिप्रोथ २ ॥

उपस्थो वक्ष्यमाणयोः ॥ ७५ ॥

लिंगयोनिका नाम १-उपस्थ १ ॥ ७५ ॥

भगं योनिर्द्वयोः—

योनिके नाम २- भग १ योनि २ ॥

शिश्नो मेढ्रो मेहनशेफसी ।

लिंगके नाम ४—शिश्न १ मेढ्र २ मेहन ३ शेफस् ४ ॥

मुष्कोऽण्डकोशो वृषणः-

अण्डकोशके नाम ३-मुष्क १ अण्डकोश २ वृषण ३ ॥

पृष्ठवंशाधरे त्रिकम् ॥ ७६ ॥

पीठके बांसके नीचे जहां तीन हाड़ मिले हैं उस जोड़का नाम १—त्रिक १ ॥ ७६ ॥

पिचण्डकुक्षी जठरोदरं तुन्दं—

पेटके नाम ५-पिचण्ड १ कुक्षि २ जठर ३ उदर ४ तुन्द ५ ॥

—स्तनौ कुचौ ।

कुचके नाम २ स्तन १ कुच २ ॥

चूचुकं तु कुचाग्रं स्या—

कुचके अग्रभागके नाम २-चूचुक १ कुचाग्र २

—न्न ना क्रोडं भुजान्तरम् ॥ ७७ ॥

गोदके नाम २-क्रोड १ भुजान्तर २ ॥ ७७ ॥

उरो वत्सं च वक्षश्च—

हृदयके नाम ३-उरस् १ वत्स २ वक्षस् ३ ॥

—पृष्ठं तु चरमं तनोः ।

पीठका नाम १ पृष्ठ १ ॥

स्कन्धो भुजशिरोंऽसोऽस्त्री—

कंधेके नाम ३-स्कन्ध १ भुजशिरस् २ अंस ३

—सन्धी तस्यैव जत्रुणी ॥ ७८ ॥

हँसलीका नाम १-जत्रु १ ॥ ७८ ॥

बाहुमूले उभे कक्षौ--

बगलोंका नाम १-कक्ष १ ॥

पार्श्वमस्त्री तयोरधः ।

बगलके नीचेका नाम १-पार्श्व १ ॥

मध्यमं चावलग्नं च मध्योऽस्त्री-

पेटके नीचेका और हाथके ऊपरके भागके नाम ३-मध्यम १ अवलग्न २ मध्य ३ ॥

—द्वौ परौ द्वयोः ॥ ७९ ॥

भुजबाहू प्रवेष्टा दोः स्यात्--

बांहके नाम ४-॥ ७९ ॥ भुज १ बाहु २ प्रवेष्ट ३ दोस् ४ ॥

कफोणिस्तु कूर्परः ।

कोनीके नाम २-कफोणि १ कूर्पर २ ॥

अस्योपरि प्रगण्डः स्यात्-

कोनीके ऊपरका नाम १-प्रगण्ड १ ॥

-प्रकोष्ठस्तस्य चाप्यधः ॥ ८० ॥

कोनीके नीचेका नाम १-प्रकोष्ठ १ ॥ ८० ॥

—मणिबन्धादाकनिष्ठं करस्य करभो बहिः ।

मणिबन्धसे कनिष्ठांगुलीपर्यन्तका नाम १—करभ १ ॥

पञ्चशाखः शयः पाणि—

हाथके नाम ३-पञ्चशाख १ शय २ पाणि ३॥

स्तर्जनी स्यात्प्रदेशिनी ॥ ८१ ॥

हाथके अँगूठेके पासकी अँगुलीके नाम २-तर्जनी १ प्रदेशिनी २ ॥ ८१ ॥

अंगुल्यः करशाखाः स्युः—

अगुलियोंके नाम २-अंगुली १ करशाखा २ ॥

-पुंस्यंगुष्ठः-

अँगूठाका नाम १-अंगुष्ठ १ ॥

—प्रदेशिनी ।

अँगूठाके पासवाली अंगुलीका नाम १-प्रदेशिनी १ ॥

मध्यमाऽनामिका चापि कनिष्ठा चेति ताः क्रमात् ॥ ८२ ॥

बीचवाली अंगुलीका नाम १-मध्यमा १ ॥

बीचवाली और कनअंगुलीके बीचवालीका नाम १-अनामिका १ ॥

कनअंगुलीका नाम १-कनिष्ठा १ ॥ ८२ ॥

पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् ।

नाखूनोंके नाम ४-पुनर्भव १ कररुह २ नख ३ नखर ४ ॥

प्रादेशतालगोकर्णास्तर्जन्यादियुते तते ॥ ८३ ॥

अंगुष्ठ तर्जनीतककी लम्बाईका नाम १—प्रादेश १ ॥

अंगुष्ठ और बीचवालीके फैलानेकी लम्बाईका नाम १-ताल १ ॥

अंगुष्ठ अनामिकाके फैलानेकी लम्बाईका नाम १-गोकर्ण १ ॥ ८३ ॥

अंगुष्ठे सकनिष्ठे स्याद्वितस्तिर्द्वादशांगुलः ।

नापनेमें बिलस्तके नाम २-वितस्ति १ द्वादशांगुल २ ॥

पाणौ चपेटप्रतलप्रहस्ता विस्तृतांगुलौ ॥ ८४ ॥

थप्पड़के नाम ३-चपेट १ प्रतल २ प्रहस्त ३ ॥ ८४ ॥

द्वौ संहतौ संहतलप्रतलौ वामदक्षिणौ

दुहत्थड़के नाम २-संहतल १ प्रतल २ ॥

पाणिर्विकुब्जः प्रसृति—

चुल्लूका नाम १—प्रसृति १ ॥

—स्तौ युतावञ्जलिः पुमान् ॥ ८५ ॥

अंजलिका नाम १-अञ्जलि १ ॥ ८५ ॥

प्रकोष्ठे विस्तृतकरे हस्तो—

हाथका नाम १-हस्त १ ॥

—मुष्ट्या तु बद्धया । सरत्निः स्या—

मुट्ठी बांधे हाथका नाम १-(सरत्नि) रत्नि १ ॥

—दरत्निस्तु निष्कनिष्ठेन मुष्टिना॥८६॥

कनअंगुलियोंको छोड़के मुट्ठी बांधे हाथका नाम १-अरत्नि १ ॥ ८६ ॥

व्यामो बाह्वोः सकरयोस्ततयोः स्तिर्यगन्तरम् ।

हाथ फैलानेका नाम १-व्याम १ ॥

ऊर्ध्वविस्तृतदोः पार्णिनृमाने पौरुषं त्रिषु ॥ ८७ ॥

ऊपरको हाथ उठाके मापनेका नाम १—पौरुष १ ॥ ८७ ॥

कण्ठो गलो—

गलेके नाम २-कण्ठ १ गल २ ॥

—ऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि ।

गर्दनके नाम ३-ग्रीवा १ शिरोधि २ कन्धरा ३ ॥

कम्बुग्रीवा त्रिरेखा सा—

तीन रेखासे युक्त गर्दनका नाम १-कम्बुग्रीवा१।

—ऽवटुर्घाटा कृकाटिका ॥ ८८ ॥

घांटीके नाम ३-अवटु १ घाटा २ कृकाटिका ३ ॥ ८८ ॥

वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्

मुँहके नाम ७-वक्त्र १ आस्य २ वदन ३ तुण्ड ४ आनन ५ लपन ६ मुख ७ ॥

कनीके घ्राणं गन्धवहा घोणा नासा च नासिका ॥ ८९ ॥

नाकके नाम ५-घ्राण १ गन्धवहा २ घोणा ३ नासा ४ नासिका ५ ॥ ८९ ॥

ओष्ठाधरौ तु रदनच्छदौ दशनवाससी ।

होंठके नाम ४-ओष्ठ १ अधर २ रदनच्छद ३ दशनवासस् ४ ॥

अधस्ताच्चिबुकं—

ठोड़ीका नाम १—चिबुक १ ॥

—गण्डौ कपोलौ—

गालके नाम २—गण्ड १ कपोल २ ॥

—तत्परा हनुः ॥ ९० ॥

कनपटीका नाम १-हनु १ ॥ ९० ॥

रदना दशना दन्ता रदा—

दांतके नाम ४-रदन १ दशन २ दन्त ३ रद ४ ॥

—स्तालु तु काकुदम् ।

तालुएके नाम २-तालु १ काकुद २ ॥

रसज्ञा रसना जिह्वा—

जीभके नाम ३ रसज्ञा १ रसना २ जिह्वा ३ ॥

—प्रान्तावोष्ठस्य सृक्किणी ॥ ९१ ॥

होंठोंके किनारोंका नाम १-सृक्किणी १॥९१॥

ललाटमलिकं गोधि—

लिलारके नाम ३-ललाट १ अलिक २ गोधि ३

ऊर्ध्वे दृग्भ्यां भ्रुवौ स्त्रियौ ॥

भौंहका नाम १- भ्रू १ ॥

कूर्चमस्त्री भ्रुवोर्मध्य—

भौंहके बीचका नाम १—कूर्च १ ॥

तारकाक्ष्णः कनीनिका ॥ ९२ ॥

आंखके तिलका नाम १-तारका १ ॥ ९२ ॥

लोचनं नयनं नेत्रमीक्षणं चक्षुरक्षिणी । दृग्दृष्टी चा—

आंखके नाम ८-लोचन १ नयन २ नेत्र ३ ईक्षण ४ चक्षुष् ५ अक्षि ६ दृश् ७ दृष्टि ८ ॥

—ऽश्रु नेत्राम्बु रोदनं चास्रमश्रु च॥९३॥

आंसूके नाम ५ अश्रु १ नेत्राम्बु २ रोदन ३ अस्र ४ अश्रु ५ ॥ ९३ ॥

अपाङ्गौ नेत्रयोरन्तौ—

आंखके किनारोंका नाम १–अपांग १ ॥

–कटाक्षोऽपाङ्गदर्शने ।

अपांगसे देखनेका नाम १—कटाक्ष १

कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः ॥ ९४ ॥

कानके नाम ६–कर्ण १ शब्दग्रह २ श्रोत्र ३ श्रुति ४ श्रवण ५ श्रवस् ६ ॥ १३ ॥

उत्तमांगं शिरः शीर्षं मूर्द्धा ना मस्तकोऽस्त्रियाम् ।

शिरके नाम ५–उत्तमांग १ शिरस् २ शीर्ष ३ मूर्धन् ४ मस्तक ५ ॥

चिकुरः कुन्तलो बालः कचः केशः शिरोरुहः ॥ ९५ ॥

बालके नाम ६–चिकुर १ कुन्तल २ बाल ३ कच ४ केश ५ शिरोरुह ६ ॥ ९५ ॥

तद्वृन्दे कैशिकं कैश्य–

बालोंके समूहके नाम २–कैशिक १ कैश्य २ ॥

–मलकाश्चूर्णकुन्तलाः ।

टेढे बालोंके नाम २–अलक १ चूर्णकुन्तल २ ॥

ते ललाटे भ्रमरकाः–

ललाटपर लटकते हुए बालोंका नाम १–भ्रमरक १

काकपक्षः शिखण्डकः ॥ ९६ ॥

जुल्फोंके नाम २—काकपक्ष १ शिखण्डक २ ॥ ९६ ॥

कबरी केशवेशौ—

मांगके नाम २–कबरी १ केशवेश २ ॥

—ऽथ धम्मिल्लः संयताः कचाः ।

बंधे हुए बालोंका नाम १ धम्मिल्ल १ ॥

शिखा चूडा केशपाशी—

चोटीके नाम ३–शिखा १ चूडा २ केशपाशी ३

—व्रतिनस्तु सटा जटा ॥ ९७ ॥

जटाके नाम २–सटा १ जटा २ ॥ ९७ ॥

वेणिः प्रवेणी—

तैलादि न लगानेके हेतु लटरे बाल हो जानेके नाम २–वेणि १ प्रवेणी २ ॥

—शीर्षण्यशिरस्यौ विशदे कचे ॥

साफ बालोंके नाम २–शीर्षण्य १ शिरस्य २ ॥

पाशः पक्षश्च हस्तश्च कलापार्थाः कचात्परे ॥ ९८ ॥

केशसमूहके नाम ३–केशपाश १ केशपक्ष २ कुन्तलहस्त ३ इत्यादि ॥ ९८ ॥

तनूरुहं रोम लोम—

रोवेंके नाम ३–तनूरुह १ रोमन् २ लोमन् ३ ॥

—तद्वृद्धे श्मश्रु पुंसि खे ।

डाढी मूछका नाम १ श्मश्रु १ ॥

आकल्पवेषौ नेपथ्यं प्रतिकर्म प्रसाधनम् ॥ ९९ ॥

अलंकारकी शोभाके नाम ५–आकल्प १ वेष २ नेपथ्य ३ प्रतिकर्मन् ४ प्रसाधन ५ ॥ ९९ ॥

दशैते त्रि—

यह आगे कहे दश शब्द तीनों लिंगोंमें होते हैं॥

—ष्वलंकर्त्ताऽलंकरिष्णुश्च—

अलंकार करनेवालेके नाम २–अलंकर्तृ १ अलंकरिष्णु २ ॥

—मण्डितः ॥ प्रसाधितोऽलंकृतश्च भूषितश्च परिष्कृतः ॥ १०० ॥

अलंकारयुक्तके नाम ५–मंडित १ प्रसाधित २ अलंकृत ३ भूषित ४ परिष्कृत ५ ॥ १०० ॥

विभ्राड् भ्राजिष्णुरोचिष्णू—

अलंकारादिसे अतिशोभित हुएके नाम ३—विभ्राज् १ भ्राजिष्णु २ रोचिष्णु ३ ॥

भूषणं स्यादलंक्रिया ।

संवारने या सिंगारनेके नाम २–भूषण १ अलंक्रिया २ ॥

अलंकारस्त्वाभरणं परिष्कारो विभूषणम् ॥ १०१ ॥ मण्डनं चा—

गहने आदिके नाम ५-अलंकार १ आभरण २ परिष्कार ३ विभूषण ४ ॥ १०१ ॥ मण्डन ५ ॥

—ऽथ मुकुटं किरीटं पुंन्नपुंसकम् ।

मुकुटके नाम २-मुकुट १ किरीट २ दोनों भी पुं० न० ॥

चूडामणिः शिरोरत्नं—

चोटीके मणिके नाम २—चूडामणि १ शिरोरत्न २ ॥

—तरलो हारमध्यगः ॥ १०२ ॥

जो हारके बीचमें सबसे बड़ा मणि होता है उसका नाम १-तरल १ ॥ १०२ ॥

बालपाश्या पारितथ्या—

चोटीके गहनेके नाम २—बालपाश्या १ पारितथ्या २ ॥

—पत्रपाश्या ललाटिका ।

बेंदी वा टीकेके नाम २-पत्रपाश्या १ ललाटिका २ ॥

कर्णिका तालपत्रं स्यात्—

बाली वा तरकीके नाम २-कर्णिका १ तालपत्र २ ॥

—कुण्डलं कर्णवेष्टनम् ॥ १०३ ॥

सुवर्णादिरचित बालीके नाम २-कुण्डल १ कर्णवेष्टन २ ॥ १०३ ॥

ग्रैवेयकं कण्ठभूषा—

कण्ठी वा कण्ठके नाम २-ग्रैवेयक १ कण्ठभूषा २ ॥

—लम्बनं स्याल्ललन्तिका ।

जो सूंडीतक लम्बी कण्ठी हो उस कण्ठीके नाम २-लम्बन १ ललंतिका २ ॥

स्वर्णैः प्रालम्बिका—

ऐसे ही यदि सोनेकी कण्ठी हो तो उस कण्ठीका नाम १-प्रालंबिका १ ॥

—थोरःसूत्रिका मौक्तिकैः कृता॥१०४॥

और वैसे ही मोतीसे गूथी हो तो उसका नाम १-उरस्सूत्रिका १ ॥ १०४ ॥

हारो मुक्तावली—

मोतीके हारके नाम २-हार १ मुक्तावली २ ॥

—देवच्छन्दोऽसौ शतयष्टिका ।

जो सौ लड़का हार हो उसका नाम १-देवच्छन्द १ ॥

हारभेदा यष्टिभेदा गुच्छगुच्छार्धगोस्तनाः ॥ १०५ ॥ अर्धहारो माणवक एकावल्येकयष्टिका । सैव नक्षत्रमाला स्यात्सप्तविंशतिमौक्तिकैः ॥ १०६ ॥

बत्तीस लड़का हार हो उसका नाम १-गुच्छ १ ॥ जो२४लड़का हार हो उसका नाम१-गुच्छार्ध १ ॥ चार लड़का हार हो उसका नाम १-गोस्तन १ ॥ १०५ ॥ बारह लड़का हार हो उसका नाम १—अर्द्धहार १ ॥ बीस लड़का हार हो उसका नाम १—माणवक १ ॥ एक लड़का हार हो उसका नाम १-एकावली १ ॥ वही एक लड़ अगर सत्ताईस मोतियोंकी हो तो उसका नाम १-नक्षत्रमाला १ ॥ १०६ ॥

आवापकः पारिहार्यः कटको वलयोऽस्त्रियाम् ।

पहुँचीके नाम ४-आवापक १ पारिहार्य २ कटक ३ वलय ४ ॥

केयूरमङ्गदं तुल्ये—

बाजूबन्द आदि भुजाके गहनोंके नाम २-केयूर १ अङ्गद २ ॥

—अंगुलीयकमूर्मिका ॥ १०७ ॥

छल्ले अँगूठीके नाम २-अंगुलीयक १ ऊर्मिका २ ॥ १०७ ॥

साक्षरांगुलिमुद्रा स्यात्-

मोहर सहित अँगूठीका नाम १-अंगुलिमुद्रा १॥

—कंकणं करभूषणम् ।

कंकनाके नाम २-कंकण १ करभूषण २ ॥

स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा ॥ १०८ ॥ क्लीबे सारसनं चा—

स्त्रीके कमरकी जंजीर अर्थात् मेखलाके नाम ५—मेखला १ काञ्ची २ सप्तकी ३ रसना ४ ॥ १०८ ॥ सारसन ५ ॥

—ऽथ पुंस्कट्यां शृङ्खलं त्रिषु ॥

पुरुषके जंजीरका नाम १—शृङ्खल १ ॥

पादांगदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम् ॥ १०९ ॥

पैंजण आदि स्त्रीके पांवके गहनेके नाम ४—पादाङ्गद १ तुलाकोटि २ मञ्जीर ३ नूपुर ४ ॥ १०९ ॥

हंसकः पादकंटकः—

कड़ेके नाम २—हंसक १ पादकंटक २ ॥

—किंकिणी क्षुद्रघण्टिका ।

घुँघुरूके नाम २—किंकिणी १ क्षुद्रघण्टिका २ ॥

त्वक्फलक्रिमिरोमाणि वस्त्रयोनि—

वृक्षोंकी छाल, फल और कीड़ोंके रोम वस्त्रके उत्पन्न होनेके स्थान हैं ॥

—दंश त्रिषु ॥ ११० ॥

यह दंशो शब्द तीनों लिङ्गोंमें होते हैं ११० ॥

वाल्कं क्षौमादि—

वृक्ष आदिकी छालसे बने हुए वस्त्रोंके नाम २ वाल्क १ क्षौम २ इत्यादि ॥

फालं तु कार्पासं बादरं च तत् ।

कपासके बने हुए वस्त्रोंके नाम ३—फाल १ कार्पास २ बादर ३ ॥

कौशेयं कृमिकोशोत्थं—

रेशमीवस्त्रोंका नाम १—कौशेय १ ॥

—राङ्कवं मृगरोमजम् ॥ १११ ॥

ऊनी वस्त्रोंका नाम १—राङ्कव १ ॥ १११ ॥

अनाहतं निष्प्रवाणि तन्त्रकं च नवाम्बरम् ।

कोरे वस्त्रके नाम ४—अनाहत १ निष्प्रवाणिन् २ तन्त्रक ३ नवाम्बर ४ ॥

तत्स्याद्युग्मनीयं यद्धौतयोर्वस्त्रयोर्युगम् ॥ ११२ ॥

धुले हुए दो वस्त्रोंके जोड़ेका नाम १—उद्गमनीय १ ॥ ११२ ॥

पत्रोण धौतकौशेयं—

धुले हुए रेशमी वस्त्रका नाम १—पत्रोर्ण १ ॥

बहुमूल्यं महाधनम् ।

बड़े मोलके वस्त्रादिका नाम १—महाधन १ ॥

क्षौमं दुकूलं स्याद्—

दुपट्टेके नाम २—क्षौम १ दुकूल २ ॥

—द्वे तु निवीतं प्रावृतं त्रिषु ॥ ११३ ॥

कपड़ेके छोरके नाम २—निवीत १ प्रावृत २ ॥ ११३ ॥

स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्त्रयोर्द्वयोः ।

छीराका नाम १—दशा १ ॥

दैर्घ्यमायाम आरोहः—

कपड़े आदिकी लम्बाईके नाम ३—दैर्घ्य १ आयाम २ आरोह ३ ॥

—परिणाहो विशालता ॥ ११४ ॥

कपड़े आदिकी चौड़ाईके नाम २—परिणाह १ विशालता २ ॥ ११४ ॥

पटच्चरं जीर्णवस्त्र—

पुराने कपड़ेके नाम २—पटच्चर १ जीर्णवस्त्र २ ॥

—समौ नक्तककर्पटौ ।

फटे चीथरेके नाम २—नक्तक १ कर्पट २ ॥

अस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् ॥ ११५ ॥

कपड़ेमात्रके नाम ६—वस्त्र १ आच्छादन २ वासस् ३ चैल ४ वसन ५ अंशुक ६ ॥ ११५ ॥

सुचेलकः पटोऽस्त्री—

अच्छे वस्त्रके नाम २-सुचेलक १ पट २ ॥

—स्याद्वराशिः स्थूलशाटकः।

मोटे वस्त्रके नाम २-वराशि १ स्थूलशाटक २

निचोलः प्रच्छदपटः—

पालकी आदिके ढकनेके वस्त्रके नाम २-निचोल १ प्रच्छदपट २ ॥

-समौ रल्लककम्बलौ ॥ ११६ ॥

कम्बलके नाम २--रल्लक १ कम्बल २ ॥११६॥

अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुके

धोतीके नाम ४-अन्तरीय १ उपसंव्यान २ परिधान ३ अधोंऽशुक ४ ॥

द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा ॥ ११७ ॥ संव्यानमुत्तरीयं च-

अंगोछा (रुमाल आदि) के नाम ५-प्रावार १ उत्तरासंग २ बृहतिका ३ ॥ ११७ ॥ संव्यान ४ उत्तरीय ५ ॥

—चोलः कूर्पासकोऽस्त्रियाम्।

चोलीके नाम २-चोल १ कूर्पासक २ ॥

नीशारः स्यात्प्रावरणे हिमानिलनिवारणे ॥ ११८ ॥

रजाईका नाम १-नीशार १। ११८।

अधोरुकं वरस्त्रीणां स्याच्चण्डातकमस्त्रियाम्।

लहंगेका नाम १-चण्डातक १ ॥

स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत् ॥ ११९ ॥

लंबे लहंगेका नाम १-आप्रपदीन १ ॥ ११९ ॥

अस्त्री वितानमुल्लोचो-

चंदोएके नाम २ वितान १ उल्लोच २ ॥

-दूष्याद्यं वस्त्रवेश्मनि।

तम्बू वा डेराका नाम १-दूष्य १ ॥

प्रतिसीरा जवनिका स्यात्तिरस्करिणी च सा ॥ १२० ॥

कनातके नाम ३-प्रतिसीरा १ जवनिका २ तिरस्करिणी ३ ॥ १२० ॥

परिकर्मांगसंस्कारः-

स्नानादि अङ्गसंस्कारके नाम २-परिकर्मन् १ अंगसंस्कार २ ॥

-स्यान्मार्ष्टिर्मार्जना मृजा।

पोंछनेके नाम ३-मार्ष्टि १ मार्जना २ मृजा ३

उद्वर्तनोत्सादने द्वे समे-

उबटनके नाम २-उद्वर्तन १ उत्सादन २ ॥

—आप्लाव आप्लवः ॥ १२१ ॥ स्नानं-

नहानेके नाम ३--आप्लाव १ आप्लव २ ॥ १२१ ॥ स्नान ३ ॥

—चर्चा तु चार्चिक्यं स्थासको-

चन्दनादिसे देहके लेपके नाम ३--चर्चा १ चार्चिक्य २ स्थासक ३ ॥

-ऽथ प्रबोधनम्। अनुबोधः-

गन्धोमटनिके नाम २--प्रबोधन १ अनुबोध २॥

-पत्रलेखापत्रांगुलिरिमे समे ॥ १२२ ॥

स्त्रियोंके गाल स्तनादिपर कस्तूरी चन्दनसे की हुई चित्रकारीके नाम २--पत्रलेखा १ पत्रांगुलि २ ॥ १२२ ॥

तमालपत्रतिलकचित्रकाणि विशेषकम्। द्वितीयं च तुरीयं च न स्त्रिया-

मस्तकमें चन्दन कस्तूरी आदिसे टीका लगानेके नाम ४-तमालपत्र १ तिलक २ चित्रक ३ विशेषक ४ ॥

-मथ कुंकुमम् ॥ १२३ ॥ काश्मीरजन्माग्निशिखं वरं बाह्लीकपीतने। रक्तसंकोचपिशुनं धीरं लोहितचन्दनम् ॥१२४॥

केशरके नाम ११-कुंकुम १ ॥ १२३ ॥ काश्मीरजन्मन् २ अग्निशिख ३ वर ४ बाह्लीक ५

पीतन ६ रक्तसंकोच ७ पिशुन ८ धीर ९ लोहित १० चन्दन ११ ॥ १२४ ॥

लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः ।

महावरके नाम ६–लाक्षा १ राक्षा २ जतु ३ याव ४ अलक्त ५ द्रुमामय ६ ॥

लवङ्गं देवकुसुमं श्रीसंज्ञ–

लौंगके नाम ३–लवंग १ देवकुसुम २ श्रीसंज्ञ ३

—मथ जायकम् ॥ १२५ ॥ कालीयकं च कालानुसार्यं चा–

पीले चन्दनके नाम ३–जायक १ ॥ १२५ ॥ कालीयक २ कालानुसार्य ३ ॥

–ऽथ समायकम् । वंशकागुरुराजार्ह-लोहकृमिजजोङ्गकम् ॥ १२६ ॥

अगरके नाम ६–वंशक १ अगुरु २ राजार्ह ३ लोह ४ कृमिज ५ जोङ्गक ६ ॥ १२६ ॥

कालागुर्वगुरुः–

काले अगरके नाम २–कालागुरु १ अगुरु २ ॥

स्यात्तन्मंगल्या मल्लिगन्धि यत् ।

अगरका भेद १–मंगल्या १ ॥

यक्षधूपः सर्जरसो रालसर्वरसावपि ॥ १२७ ॥ बहुरूपो–

रालके नाम ५–यक्षधूप १ सर्जरस २ राल ३ सर्वरस ४ ॥ १२७ ॥ बहुरूप ५ ॥

–ऽथ वृकधूपः कृत्रिमधूपकौ ॥

कृत्रिम धूपके नाम २–वृकधूप १ कृत्रिम-धूप २ ॥

तुरुष्कः पिण्डकः सिल्हो यावनो–

लोबानके नाम ४–तुरुष्क १ पिण्डक २ सिल्ह ३ यावन ४ ॥

ऽथ पायसः ॥ १२८ ॥ श्रीवासो वृक-धूपोऽपि श्रीवेष्टसरलद्रवौ ।

देवदारु धूपके नाम ५—पायस १ ॥ १२८ ॥ श्रीवास २ वृकधूप ३ श्रीवेष्ट ४ सरलद्रव ५ ॥

मृगनाभिर्मृगमदः कस्तूरी चा—

कस्तूरीके नाम ३—मृगनाभि १ मृगमद २ कस्तूरी ३ ॥

–ऽथ कोलकम् ॥ १२९ ॥ कंकोलकं कोशफलं—

कंकोलके नाम ३—कोलक १ ॥१२९॥ कंकोलक २ कोशफल ३ ॥

–मथ कर्पूरमस्त्रियाम् । घनसारश्चन्द्र-संज्ञः सिताभ्रो हिमवालुका ॥ १३० ॥

कर्पूरके नाम ५—कर्पूर१ घनसार २ चन्द्रसंज्ञ३ सिताभ्र ४ हिमवालुका ५ ॥ १३० ॥

गन्धसारो मलयजो भद्रश्रीश्चंदनोऽस्त्रि-याम् ।

मलयागिरि चन्दनके नाम ४—गन्धसार १ मलयज २ भद्रश्री ३ चन्दन ४ ॥

तैलपर्णिकगोशीर्षं हरिचन्दनमस्त्रि-याम् ॥ १३१ ॥

सफेद चन्दनका नाम१—तैलपर्णिक१ ॥जिसमें कमलके समान गन्ध हो उस चन्दनका नाम १—गोशीर्ष१॥ कपिलवर्ण चन्दनका नाम१—हरिचन्दन १ ॥ १३१ ॥

तिलपर्णी तु पत्रांगं रञ्जनं रक्तचन्दनम् । कुचन्दनं चा—

लालचन्दनके नाम ५–तिलपर्णी १ पत्रांग २ रञ्जन ३ रक्तचन्दन ४ कुचन्दन ५ ॥

–ऽथ जातीकोशजातीफले समे ॥१३२॥

जायफलके नाम २—जातीकोश १ जाती-फल २ ॥ १३२ ॥

कर्पूरागरुकस्तूरीकंकोलैर्यक्षकर्दमः ।

कपूर अगर कस्तूरी और कंकोल इनको बराबर मिलानेसे जो लेपन बनता है उसका नाम १—यक्षकर्दम १ ॥

गात्रानुलेपनी वर्तिर्वर्णकं स्याद्विलेप-नम् ॥ १३३ ॥

पिसी हुई लेपन वस्तुके नाम २—गात्रानुलेपनी १ वर्ति २ ॥ घिसी (रगड़ी) हुई लेपन वस्तुके नाम २-वर्णक १ विलेपन २ ॥ १३३ ॥

चूर्णानि वासयोगाः स्यु-

कपड़छान करके जो वस्तु घोली जाय उसके नाम २-चूर्ण १ वासयोग २ ॥

-भावितं वासितं त्रिषु ।

पुष्प इत्यादिसे बसायी हुई वस्तुके नाम २—भावित १ वासित २ ॥

संस्कारो गंधमाल्याद्यैः स्यान्नदधिवासनम् ॥ १३४ ॥

सुगंध पुष्पादिसे संस्कार करनेका नाम १—अधिवासन १ ॥ १३४ ॥

माल्यं मालास्रजौ मूर्ध्नि-

सिरपर धारण करने योग्य मालाके नाम ३—माल्य १ माला २ स्रज् ३ ॥

-केशमध्ये तु गर्भकः ।

बालोंके बीचमें धारण की हुई मालाका नाम १-गर्भक १ ॥

प्रभ्रष्टकं शिखालम्बि-

जो चोटीमें गुँथी हुई माला हो उसका नाम १-प्रभ्रष्टक १ ॥

-पुरोन्यस्तं ललामकम् ॥ १३५ ॥

जो शिखासे लिलारतक लपेटी माला हो उसका नाम १-ललामक १ ॥ १३५ ॥

प्रालम्बमृजुलम्बि स्यात्कण्ठा-

कंठमें पहनी हुई मालाका नाम १-प्रालम्ब १ ॥

द्वैकक्षिकं तु तत् । यत्तिर्यक् क्षिप्तमुरसि—

जो यज्ञोपवीतके तुल्य पहनी जाय उस मालाका नाम १—वैकक्षिक १ ॥

-शिखास्वापीडशेखरौ ॥ १३६ ॥

जो शिखामें पहनी जाय उस मालाके नाम २-आपीड १ शेखर २ ॥ १३६ ॥

रचना स्यात्परिस्पन्द-

माला आदि बनानेके नाम २—रचना १ परिस्पन्द २ ॥

आभोगः परिपूर्णता ।

सर्व सामग्रीके पूरे होनेके नाम २—आभोग १ परिपूर्णता २ ॥

उपधानं तूपबर्हः-

तकियेके नाम २-उपधान १ उपबर्ह २ ॥

-शय्यायां शयनीयवत् ॥ १३७ ॥ शयनं-

बिछौनेके नाम ३-शय्या १ शयनीय १ ॥ १३७ ॥ शयन ३ ॥

मञ्चपर्यंकपल्यंकाःखट्वया समाः ।

पलँग वा खाटके नाम ४-मंच १ पर्यङ्क २ पल्यंक ३ खट्वा ४ ॥

गेन्दुकः कन्दुको-

गेंदके नाम २-गेन्दुक १ कन्दुक २ ॥

-दीपः प्रदीपः-

दियाके नाम २-दीप १ प्रदीप २ ॥

--पीठमासनम् ॥ १३८ ॥

पीढ़ाके नाम २—पीठ १ आसन २ ॥ १३८ ॥

समुद्गकः सम्पुटकः-

डिब्बाके नाम २-समुद्गक १ संपुटक २ ॥

--प्रतिग्राहः पतद्ग्रहः ।

पीकदानके नाम २-प्रतिग्राह १ पतद्ग्रह २ ॥

प्रसाधनी कंकतिका—

कंघीके नाम २—प्रसाधनी १ कंकतिका २ ॥

-पिष्टातः पटवासकः ।

बुक्काके नाम २-पिष्टात १ पटवासक २ ॥

दर्पणे मुकुरादर्शौ-

दर्पण (सीसे) के नाम ३—दर्पण १ मुकुर २ आदर्श ३ ॥

-व्यजनं तालवृन्तकम् ॥ १३९ ॥

पंखेके नाम २—व्यजन १ तालवृन्तक २ ॥ १३९ ॥

इति मनुष्यवर्गः ॥ ६ ॥

अथ ब्रह्मवर्गः ७.

संततिर्गोत्रजननकुलान्यभिजनान्वयौ । वंशोऽन्ववायः सन्तानो—

वंशके नाम ९—सन्तति १ गोत्र २ जनन ३ कुल ४ अभिजन ५ अन्वय ६ वंश ७ अन्ववाय ८ सन्तान ९ ॥

—वर्णाः स्युर्ब्राह्मणादयः ॥ १ ॥

ब्राह्मण आदिका नाम १—वर्ण १ ॥ १ ॥

विप्रक्षत्रियविट्छूद्राश्चातुर्वर्ण्यमिति स्मृतम् ।

ब्राह्मण, क्षत्रिय, वैश्य, शूद्र इन चारोंका इकट्ठा नाम १—चातुर्वर्ण्य १ ॥

राजबीजी राजवंश्यो—

राजाके वंशवालोंके नाम २—राजबीजिन् १ राजवंश्य २ ॥

—बीज्यस्तु कुलसंभवः ॥ २ ॥

कुलीनके नाम २—बीज्य १ कुलसंभव २ ॥२॥

महाकुलकुलीनार्यसभ्यसज्जनसाधवः ।

सज्जनके नाम ६—महाकुल १ कुलीन २ आर्य्य ३ सभ्य ४ सज्जन ५ साधु ६ ॥

ब्रह्मचारी गृही वानप्रस्थो भिक्षुश्चतुष्टये ॥ ३ ॥ आश्रमाऽस्त्री—

ब्रह्मचारी, गृही, वानप्रस्थ, यति इन चारोंका इकट्ठा नाम १—॥ ३ ॥ आश्रम १ ॥

—द्विजात्यग्रजन्मभूदेववाडवाः । विप्रश्च ब्राह्मणो—

ब्राह्मणके नाम ६—द्विजाति १ अग्रजन्मन् २ भूदेव ३ वाडव ४ विप्र ५ ब्राह्मण ६ ॥

—ऽसौ षट्कर्मा यागादिभिर्वृतः ॥ ४ ॥

इज्या, अध्ययन, दान, याजन, अध्यापन, प्रतिग्रह इन षट् कर्मोंकरके युक्त विप्रका नाम १—षट्कर्मन् १ ॥ ४ ॥

विद्वान्विपश्चिद्दोषज्ञः सन्नुधीः कोविदो बुधः । धीरो मनीषी ज्ञः प्राज्ञः संख्यावान्पण्डितः कविः ॥ ५ ॥ धीमान्सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः । दूरदर्शी दीर्घदर्शी—

पंडितके नाम २२—विद्वस् १ विपश्चित् २ दोषज्ञ ३ सत् ४ सुधी ५ कोविद ६ बुध ७ धीर ८ मनीषिन् ९ ज्ञ १० प्राज्ञ ११ संख्यावत् १२ पंडित १३ कवि १४ ॥ ५ ॥ धीमत् १५ सूरि १६ कृतिन् १७ कृष्टि १८ लब्धवर्ण १९ विचक्षण २० दूरदर्शिन् २१ दीर्घदर्शिन् २२ ॥

श्रोत्रियच्छान्दसौ समौ ॥ ६ ॥

वेदपाठीके नाम २ श्रोत्रिय १ छान्दस २ ॥६॥

उपाध्यायोऽध्यापको—

जो पढ़ाता हो उस पंडितके नाम २—उपाध्याय १ अध्यापक २ ॥

—ऽथ स्यान्निषेकादिकृद् गुरुः ।

गर्भाधानादि कर्म्म करानेवालेका नाम १—गुरु १ ॥

मन्त्रव्याख्याकृदाचार्य—

मन्त्रकी व्याख्या करनेवालेका नाम १—आचार्य १ ॥

—आदेष्टा त्वध्वरे—

यज्ञमें सब ऋत्विजोंमें सिखानेवालेका नाम १—आदेष्टृ १ ॥

—व्रती ॥ ७ ॥ यष्टा च यजमानश्च—

यजमानके नाम ३—व्रतिन् १ ॥ ७ ॥ यष्टृ २ यजमान ३ ॥

—स सोमवति दीक्षितः ।

सोमयज्ञके यजमानका नाम १—दीक्षित १ ॥

इज्याशीलो यायजूको—

बारंवार यज्ञ करनेवालेके नाम २--इज्याशील १ याययूक २ ॥

--यज्वा तु विधिनेष्टवान् ॥ ८ ॥

जो विधिसे यज्ञ करे उसका नाम १--यज्वन् १ ॥ ८ ॥

स गीष्पतीष्ट्या स्थपतिः--

बृहस्पति यज्ञ करनेवालेका नाम १--स्थपति १

सोमपीथी तु सोमपाः ।

सोमवल्लिका रस पीनेवालेक नाम २--सोमपीथिन् १ सोमपा २ ॥

सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः ॥ ९ ॥

जो यज्ञमें अपना सब धन दे डाले उसका नाम १--सर्ववेदस् १ ॥ ९ ॥

अनूचानः प्रवचने साङ्गेऽधीतीं--

सांगोपांग वेद पढ़नेवालेका नाम १-अनूचान १

--गुरोस्तु यः । लब्धानुज्ञः समावृत्तः--

वही अनूचान गुरुकी गृहस्थाश्रमादिमें प्राप्त होनेकी आज्ञा पावे तो उसका नाम १-समावृत्त १

--सुत्वा त्वभिषवे कृते ॥ १० ॥

अभिषव स्नान करे उसका नाम १-सुत्वन् १ ॥ १० ॥

छात्रान्तेवासिनौ शिष्ये--

विद्यार्थीके नाम ३-छात्र १ अन्तेवासिन् २ शिष्य ३ ॥

--शैक्षाः प्राथमकल्पिकाः ।

छोटे (नये) विद्यार्थीके नाम २-शैक्ष १ प्राथमकल्पिक २ ॥

एकब्रह्मव्रताचारा मिथः सब्रह्मचारिणः ॥ ११ ॥

सहपाठी अर्थात् एक साथ एक ही वस्तु पढ़नेवालेका नाम १—सब्रह्मचारिन् १ ॥ ११ ॥

--सतीर्थ्यास्त्वेकगुरव--

जितने एक गुरुसे पढ़ते हों उनका नाम १—सतीर्थ्य १ ॥

--श्चितवानग्निमग्निचित् ।

जो अग्निको बटोरता है उसका नाम १—अग्निचित् १ ॥

पारम्पर्योपदेशे स्यादैतिह्यमितिहाव्ययम् ॥ १२ ॥

परम्परा उपदेशके नाम २—ऐतिह्य १ इतिहा २ ॥ १२ ॥

--उपज्ञा ज्ञानमाद्यं स्या--

प्रथम ज्ञानका नाम १—उपज्ञा १ ॥

--ज्ञात्वारम्भ उपक्रमः ।

समझके ग्रन्थके प्रारम्भ करनेका नाम १-उपक्रम १ ॥

यज्ञः सवोऽध्वरो यागः सप्ततन्तुर्मखः क्रतुः ॥ १३ ॥

यज्ञके नाम ७-यज्ञ १ सव २ अध्वर ३ याग ४ सप्ततन्तु ५ मख ६ क्रतु ७ ॥ १३ ॥

पाठो होमश्चातिथीनां सपर्या तर्पणं बलिः । एते पञ्च महायज्ञा ब्रह्मयज्ञादि नामकाः ॥ १४ ॥

महायज्ञके नाम ५-पाठ १ होम २ अतिथिपूजा ३ तर्पण ४ बलि ५ ॥ १४ ॥

समज्या परिषद्गोष्ठी सभासमिति संसदः । आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः ॥ १५ ॥

सभाके नाम ९-समज्या १ परिषद् २ गोष्ठी ३ सभा ४ समिति ५ संसद् ६ आस्थानी ७ आस्थान ८ सदस् ९ ॥ १५ ॥

प्राग्वंशः प्राग्धविर्गेहात्--

सदस्योंके गृहका नाम १-प्राग्वंश १ ॥

--सदस्या विधिदर्शिनः ।

सभाके विचार करनेवालोंका नाम १-सदस्य १

सभासदः सभास्ताराः सभ्याः सामाजिकाश्च ते ॥ १६ ॥

सभामें बैठनेवालोंके नाम ४–सभासद् १ सभास्तार २ सभ्य ३ सामाजिक ४ ॥ १६ ॥

अध्वर्युद्गातृहोतारो यजुःसामर्ग्विदः क्रमात् ।

यजुर्वेद जाननेवालेका नाम १–अध्वर्यु १ ॥ सामवेदीका नाम १ उद्गातृ १ ॥ ऋग्वेदीका नाम १—होतृ १ ॥

आग्नीध्राद्या धनैर्वार्या ऋत्विजो याजकाश्च ते ॥ १७ ॥

जिनको धनआदि देकर यज्ञमें वरण किया जाय उस आग्नीध्र आदि सोलहके नाम २–ऋत्विज् १ याजक २ ॥ १७ ॥

वेदिः परिष्कृता भूमिः—

वेदीका नाम १–वेदि १ ॥

—समं स्थण्डिलचत्वरे ।

यज्ञार्थ चबूतराके नाम २–स्थण्डिल १ चत्वर २

चषालो यूपकटकः—

खम्भाके ऊपर जो ककणाकार काष्ठका रहता है उसके नाम २–चषाल २ यूपकटक २ ॥

—कुम्बा सुगहना वृतिः ॥ १८ ॥

यज्ञोंको अन्यजाति न देखनेके निमित्त जो टट्टी आदि लगाई जाती है उसका नाम १–कुम्बा १ ॥ १८ ॥

यूपाग्रं तर्म—

यज्ञस्तम्भके आगेके नाम २–यूपाग्र १ तर्मन् २

—निर्मन्थ्यदारुणि त्वरणिर्द्वयोः ।

जिस लकड़ीको मथके अग्नि निकालते हैं उसका नाम १ अरणि १ ॥

दक्षिणाग्निर्गार्हपत्याहवनीयौ त्रयोऽग्नयः ॥ १९ ॥

यज्ञकी अग्निके नाम ३–दक्षिणाग्नि १ गार्हपत्य २ आहवनीय ३ ॥ १९ ॥

अग्नित्रयमिदं त्रेता—

इन तीनों अग्नियोंका नाम १–त्रेता १ ॥

—प्रणीतः संस्कृतोऽनलः ।

संस्कारित अग्निका नाम १–प्रणीत १ ॥

समूह्यः परिचाय्योपचाय्यावग्नौ प्रयोगिणः ॥ २० ॥

यज्ञाग्निके नाम ३–समूह्य १ परिचाय्य २ उपचाय्य ३ ॥ २० ॥

यो गार्हपत्यादानीय दक्षिणाग्निः प्रणीयते । तस्मिन्नानाय्यो—

गार्हपत्याग्निसे लेकर जो दक्षिणाग्नि प्रवेश कराया जाय उसका नाम १–आनाय्य १ ॥

—ऽथाग्नायी स्वाहा च हुतभुक्प्रिया ॥ २१ ॥

स्वाहा अर्थात् अग्निकी स्त्रीके नाम ३–अग्नायी १ स्वाहा २ हुतभुक्प्रिया ३ ॥ २१ ॥

ऋक्सामिधेनी धाय्या च या स्यादग्निसमिन्धने ।

अग्नि बालनेके अर्थ जो ऋचा पढी जाय उसके नाम २–सामिधेनी १ धाय्या २॥

गायत्रीप्रमुखं छन्दो–

गायत्री, उष्णिह, अनुष्टुभ् इत्यादिका नाम १–छन्दस् १ ॥

–हव्यपाके चरुः पुमान् ॥ २२ ॥

अग्निमें छोड़ने योग्य साकल्यका नाम १–चरु १ ॥ २२ ॥

आमिक्षा सा शृतोष्णे या क्षीरे स्याद्दधियोगतः ।

गरम पके दूधमें दही डालनेसे जो बनता है उसका नाम १–आमिक्षा १ ॥

धवित्रं व्यजनं तद्यद्रचितं मृगचर्मणा ॥ २३ ॥

मृगचर्मसे बने हुए बीजनेका नाम १–धवित्र १ ॥ २३ ॥

पृषदाज्यं सदध्याज्ये-

दही घी मिले हुएका नाम १--पृषदाज्य १ ॥

-परमान्नं तु पायसम्।

खीरके नाम २--परमान्न १ पायस २ ॥

हव्यकव्ये दैवपित्र्ये अन्ने-

देवताके अर्थकी खीरका नाम १--हव्य १ । पितरोंकी खीरका नाम १--कव्य १ ॥

पात्रं स्रुवादिकम् ॥ २४ ॥

स्रुवा आदिका नाम १--पात्र १ ॥ २४ ॥

ध्रुवोपभृज्जुहूर्ना तु स्रुवो भेदाः स्रुचः स्त्रियः ॥

स्रुवाके भेद ५--ध्रुवा १ उपभृत् २ जुहू ३ स्रुव ४ स्रुच् --५ ॥

उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥ २५ ॥

यज्ञके पशुका नाम १-उपाकृत १ ॥ २५ ॥

परम्पराकं शमनं प्रोक्षणं च वधार्थकम्

यज्ञके अर्थ पशु मारनेके नाम ३--परम्पराक १ शमन २ प्रोक्षण ३ ॥

वाच्यलिंगाः प्रमीतोपसंपन्नप्रोक्षिता हते ॥ २६ ॥

यज्ञमें मारे हुए पशुके नाम ३-- प्रमीत १ उपसम्पन्न २ प्रोक्षित ३ ॥ २६ ॥

सान्नाय्यं हवि—

साकल्यके नाम २—सान्नाय्य १ हविष् २ ॥

—रग्नौ तु हुतं त्रिषु वषट्कृतम्।

अग्निमें जो हुना जावे उसका नाम १—वषट्कृत १ ॥

दीक्षान्तोऽवभृथो यज्ञ—

यज्ञान्तस्नानका नाम १—अवभृथ १ ॥

—स्तत्कर्मार्हं तु यज्ञियम्। ॥ २७ ॥

यज्ञयोग्यवस्तुका नाम १-यज्ञिय १ ॥ २७ ॥

—थ क्रतुकर्मेष्टं—

यज्ञमें कर्मका नाम १—इष्ट १ ॥

—पूर्तं खातादिकर्म यत्।

बावडी तालाब आदि खुदानेका नाम १-पूर्त १

अमृतं विघसो यज्ञशेषभोजनशेषयोः ॥ २८ ॥

यज्ञसे बची हुई जाऊरि आदिका नाम १-अमृत १ ॥ और भोजनसे बची हुई वस्तुका नाम १-विघस १ ॥ २८ ॥

त्यागो विहापित दानमुत्सर्जनविसर्जने। विश्राणनं वितरणं स्पर्शनं प्रतिपादनम् ॥ २९ ॥ प्रादेशनं निर्वपणमपवर्जनमंहतिः।

दानके नाम १३--त्याग १ विहापित २ दान ३ उत्सर्जन ४ विसर्जन ५ विश्राणन ६ वितरण ७ स्पर्शन ८ प्रतिपादन ९ ॥ २९ ॥ प्रादेशन १० निर्वपण ११ अपवर्जन १२ अंहति १३ ॥

मृतार्थं तद्दहे दानं त्रिषु स्यादौर्ध्वदेहिकम् ॥ ३० ॥

मृतकके अर्थ जो दश दिनके बीचमें पिंडादि दिये जाते हैं उनका नाम १--और्ध्वदेहिक १ ॥ ३० ॥

पितृदानं निवापः स्या—

पितरोंके देनेके निमित्त जो दान दिया जावे उसके नाम २-पितृदान १ निवाप २ ॥

च्छ्राद्धं तत्कर्म शास्त्रतः।

पितरोंके देनेके निमित्तके कर्मका नाम १--श्राद्ध १ ॥

अन्वाहार्यं मासिकं--

अमावस्याके श्राद्धके नाम २--अन्वाहार्य १ मासिक २ ॥

—ऽशोऽष्टमोऽह्नः कुतपोऽस्त्रियाम् ॥ ३१ ॥

दिनके आठवें हिस्सेका नाम १--कुतप १ ॥ ३१ ॥

पर्येषणा परीष्टिश्चान्वेषणा च गवेषणा ।

श्राद्धमें ब्राह्मणकी भक्ति और सेवा करनेके नाम २--पर्येषणा १ परिष्टि २ ॥ धर्म आदिके खोजनेके नाम २--अन्वेषणा १ गवेषणा २ ॥ अथवा ये चारों नाम धर्म आदिके खोजनेके ही जानने ॥

सनिस्त्वध्येषणा—

विनतीके नाम २--सनि १ अध्येषणा २

—याच्ञाऽभिशस्तिर्याचनार्थना ॥३२॥

मांगनेके नाम ४याच्ञा १ अभिशस्ति २ याचना ३ अर्थना ४ ॥ ३२ ॥

—षट् तु त्रि—

यह छः शब्द तीनों लिंगोंमें होते हैं ॥

—ष्वर्घ्यमर्थार्थे पाद्यं पादाय वारिणि ।

पूजार्थ पानी छोड़नेका नाम १--अर्घ्य १ ॥ पांव धोनेको छोड़ने योग्य पानीका नाम १--पाद्य १ ॥

क्रमादातिथ्यातिथेये अतिथ्यर्थेऽत्रसाधुनि ॥ ३३ ॥

अतिथिके अर्थ जो कर्म उसका नाम १--आतिथ्य १ ॥ अतिथिके निमित्त जो सिद्ध हो वह १--आतिथेय १ ॥ ३३ ॥

स्युरावेशिक आगन्तुरतिथिर्नो गृहागते ।

महिमानके नाम ४--आवेशिक १ आगन्तु २ अतिथि ३ गृहागत ४ ॥

पूजा नमस्याऽपचितिः सपर्यार्चार्हणाः समाः ॥ ३४ ॥

पूजाके नाम ६--पूजा १ नमस्या २ अपचिति ३ सपर्या ४ अर्चा ५ अर्हणा ६ ॥ ३४ ॥

वरिवस्या तु शुश्रूषा परिचर्याऽप्युपासना ।

उपासनाके नाम ४--वरिवस्या १ शुश्रूषा २ परिचर्या ३ उपासना ४ ॥

व्रज्याऽटाट्या पर्यटनं—

विदेशमें भ्रमण करनेके नाम ३--व्रज्या १ अटाट्या २ पर्यटन ३ ॥

—चर्या त्वीर्यापथे स्थितिः ॥ ३५ ॥

योगमार्गमें स्थितिका नाम १--चर्या १ ॥३५॥

उपस्पर्शस्त्वाचमन—

आचमनके नाम २--उपस्पर्श १ आचमन २ ॥

—मथ मौनमभाषणम् ।

चुप रहनेके नाम २--मौन १ अभाषण २ ॥

आनुपूर्वी स्त्रियां वाऽऽवृत्परिपाटी अनुक्रमः ॥ ३६ ॥ पर्यायश्चा

अनुक्रमके नाम ५--आनपूर्वी १ आवृत् २ परिपाटी ३ अनुक्रम ४ ॥ ३६ ॥ पर्य्याय ५ ॥

—ऽतिपातस्तु स्यात्पर्यय उपात्ययः ।

अतिक्रमके नाम ३--अतिपात १ पर्य्यय २ उपात्यय ३ ॥

नियमो व्रतमस्त्री—

व्रतके नाम २--नियम १ व्रत २ ॥

—तच्चोपवासादि पुण्यकम् ॥ ३७ ॥

चान्द्रायणादि व्रतकों नाम १--पुण्यक १ ॥ ३७ ॥

औपवस्तं तूपवासो—

उपवासके नाम २--औपवस्त १ उपवास २ ॥

—विवेकः पृथगात्मता ।

प्रकृतिपुरुषके भेद जाननेके विचारके नाम २--विवेक १ पृथगात्मता २ ॥

स्यादब्रह्मवर्चसं वृत्ताध्ययनर्द्धि—

सदाचारपालन और वेदाभ्यास करनेसे जो तेज होता है उसका नाम १--ब्रह्मवर्चस १ ॥

—रथाञ्जलिः ॥ ३८ ॥ पाठे ब्रह्माञ्जलिः—

भुने हुए जौके नाम २-धाना १ भृष्टयव २ ॥ ४७ ॥

पूपोऽपूपः पिष्टकः स्यात—

पूएके नाम ३-पूप १ अपूप २ पिष्टक ३ ॥

—करम्भो दधिसक्तवः ।

दधियुक्त सत्तुओंके नाम २-करम्भ १ दधिसक्तु २ ॥

भिस्सा स्त्री भक्तमन्धोऽन्नमोदनोऽस्त्री स दीदिविः ॥ ४८ ॥

भातके नाम ६-भिस्सा १ भक्त २ अन्धस् ३ अन्न ४ ओदन ५ दीदिवि ६ ॥ ४८ ॥

भिस्सटा दग्धिका—

जले अन्नके नाम २-भिस्सटा १ दग्धिका २ ॥

-सर्वरसाग्रे मण्डमस्त्रियाम् ।

मांड़का नाम १-मण्ड १ ॥

मासराचामनिस्रावा मण्डे भक्तसमुद्भवे ॥ ४९ ॥

केवल भातके मांडके नाम ३-मासरा १ आचाम २ निस्राव ३ ॥ ४९ ॥

यवागूरुष्णिका श्राणा विलेपी तरला च सा ।

पतले भातके नाम ५-यवागू १ उष्णिका २ श्राणा ३ विलेपी ४ तरला ५ ॥

गव्यं त्रिषु गयां सर्व—

गायसे उत्पन्न वस्तुका नाम १-गव्य १ ॥

—गोविट् गोमयमस्त्रियाम् ॥ ५० ॥

गौके गोबरके नाम २—गोविष् १ गोमय २ ॥ ५० ॥

तत्तु शुष्कं करीषोऽस्त्री-

सूखे हुए गोबरका नाम १-करीष १ ॥

—दुग्धं क्षीरं पयः समम् ।

दूधके नाम ३-दुग्ध १ क्षीर २ पयस् ३ ॥

पयस्यमाज्यदध्यादि—

घृत दही आदिका नाम १-पयस्य १ ॥

द्रप्सं दधि घनेतरत् ॥ ५१ ॥

पतले दहीका नाम १-द्रप्स १ ॥ ५१ ॥

घृतमाज्यं हविः सर्पि—

घीके नाम ४-घृत १ आज्य २ हविष् ३ सर्पिष् ४ ॥

-नवनीतं नवोद्धृतम् ।

मक्खनके नाम २- नवनीत १ नवोद्धृत

तत्तु हैयङ्गवीनं यद्द्व्योगोदोहोद्भवं घृतम् ॥ ५२ ॥

नौनीघीका नाम १-हैयङ्गवीन १ ॥ ५२ ॥

दण्डाहतं कालशेयमरिष्टमपि गोरसः ।

मट्ठेके नाम ४-दण्डाहत १ कालशेय २ अरिष्ट ३ गोरस ४ ॥

तक्रं हृद्युदश्वित्मथितं पादाम्ब्वर्धाम्बु निर्जलम् ॥ ५३ ॥

मट्ठेके भेद ३—तक्र १ उदश्वित २ मथित ३ ॥ ५३ ॥

मण्डं दधिभवं मस्तु—

दहीके पानीका नाम १-मस्तु १ ॥

—पीयूषोऽभिनवं पयः ।

खीसका नाम १-पीयूष १ ॥

अशनाया बुभुक्षा क्षुद्—

भूखके नाम ३—अशनाया १ बुभुक्षा२ क्षुध् ३।

ग्रासस्तु कवलः पुमान् ॥ ५४ ॥

ग्रासके नाम २-ग्रास १ कवल २ ॥ ५४ ॥

सपीतिः स्त्री तुल्यपानं-

साथ पीनेके नाम २-सपीति १ तुल्यपान २ ॥

सग्धिः स्त्री सहभोजनम् ।

एकसाथ भोजन करनेके नाम २-सग्धि १ सहभोजन २ ॥

उदन्या तु पिपासा तृट् तर्षो-

प्यासके नाम ४-उदन्या १ पिपासा २ तृष् ३ तर्ष ४ ॥

—जग्धिस्तु भोजनम् ॥ ५५ ॥
जेमनं लेह आहारो निघासो न्याद इत्यपि

भोजनके नाम ७-जग्धि १ भोजन २ ॥ ५५ ॥ जेमन ३ लेह ४ आहार ५ निघास ६ न्याद ७ ॥

सौहित्यं तर्पणं तृप्तिः—

तृप्तिके नाम ३-सौहित्य १ तर्पण २ तृप्ति ३॥

—फेला भुक्तसमुज्झितम् ॥ ५६ ॥

भोजन करके त्यागी हुई वस्तुका नाम १-फेला १ ॥ ५६ ॥

कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सितम् ।

इच्छाके नाम ६-काम १ प्रकाम २ पर्याप्त ३ निकाम ४ इष्ट ५ यथेप्सित ६ ॥

गोपगोपालगोसंख्यगोधुगाभीरबल्लवाः ॥ ५७ ॥

अहीरके नाम ६-गोप १ गोपाल २ गोसंख्य ३ गोदुह ४ आभीर ५ बल्लव ६ ॥ ५७ ॥

गोमहिष्यादिकं पादबन्धनं—

घरमें बांधने लायक गाय भैंस आदिका नाम १-पादबन्धन १ ॥

—द्वौ गवीश्वरे । गोमान्गोमी—

गायके मालिकके नाम ३-गवीश्वर १ गोमत् २ गोमिन् ३ ॥

गोकुलं तु गोधनं स्याद्गवां व्रजे ॥ ५८॥

गायोंके समूहके नाम २-गोकुल १ गोधन २ ॥ ५८ ॥

त्रिष्वाशितं गवीनं तद्गावो यत्राशिताः पुरा ।

जहां गैयाँ आदिको पहिले खिलाया गया हो उस स्थानका नाम १-आशितगवीन १ ॥

उक्षा भद्रो बलीवर्द ऋषभो वृषभो वृषः ॥ ५९ ॥ अनड्वान्सौरभेयो गौ—

बैलके नाम ९—उक्षन् १ भद्र २ बलीवर्द ३ ऋषभ ४ वृषभ ५ वृष ६ ॥ ५९ ॥ अनडुह् ७ सौरभेय ८ गो ९ ॥

कक्षणां संहतिरौक्षकम् ।

बैलोंके समूहका नाम १-औक्षक १ ॥

गव्या गोत्रा गवाम्—

गावोंके समूहके नाम २-गव्या १ गोत्रा २ ॥

—वत्सधेन्वोर्वात्सकधैनुके ॥ ६० ॥

बछड़ोंके समूहका नाम १–वात्सक १ ॥ धेनुओं के समूहका नाम १–धैनुक १ ॥ ६० ॥

वृषो महान्महोक्षः स्याद्—

बड़े बैलका नाम १–महोक्ष १ ॥

—वृद्धोक्षस्तु जरद्गवः ।

बूढ़े बैलके नाम २–वृद्धोक्ष १ जरद्गव २ ॥

उत्पन्न उक्षा जातोक्षः ।

जवान बैलका नाम १ जातोक्ष १ ॥

—सद्योजातस्तु तर्णकः ॥ ६१ ॥

छोटे बछरेका नाम १–तर्णक १ ॥ ६१ ॥

शकृत्करिस्तु वत्सः स्याद्—

बछड़ेमात्रके नाम २–शकृत्करि १ वत्स २ ॥

—दम्यवत्सतरौ समौ ।

थोड़े जवान बछड़ेके नाम २–दम्य१ वत्सतर२॥

आर्षभ्यः षण्डतायोग्यः—

बधिया करने लायकका नाम १–आर्षभ्य १ ॥

—षण्डो गोपतिरिट्चरः ॥ ६२ ॥

सांड़के नाम ३–षण्ड १ गोपति २ इट्चर ३ ॥ ६२ ॥

स्कन्धदेशे त्वस्य वहः—

बैलके कन्धेका नाम १–वह १ ॥

—सास्ना तु गलकम्बलः ।

गैयोंके गलेमें जो मांस लटकता है उस मांसके नाम २–सास्ना १ गलकम्बल २ ॥

स्यान्नस्तितस्तु नस्योतः—

नाथवाले बैलके नाम २–नस्तित १ नस्योत २॥

—प्रष्ठवाड् युगपार्श्वगः ॥ ६३ ॥

जिससे गाड़ीमें जोतनेके अर्थ बैल सधाये जायँ उस काष्ठके नाम २–प्रष्ठवाड् १ युगपार्श्वग २।६३।

युगादीनां तु वोढारो युग्यमासंग्यशाकटाः ।

जुएके उठानेवालेका नाम १–युग्य १ ॥ जोड़ उठानेवालेका नाम १–प्रासङ्ग्य १ ॥ छकड़ेके उठानेवाले बैलका नाम १–शाकट १ ॥

खनिति तेन तद्वोढाऽस्येदं हालिकसैरिकौ ॥ ६४ ॥

हलमें चलनेवालेके नाम २–हालिक १ सैरिक २ ॥ ६४ ॥

धूर्वहे धुर्यधौरेयधुरीणाः सधुरंधराः ।

बोझा ढोनेवाले बैलके नाम ५–धूर्वह १ धुर्य्य २ धौरेय ३ धुरीण ४ धुरन्धर ५ ॥

उभावेकधुरीणैकधुरावेकधुरावहे। ६५॥

एक बोझेके ढोनेवालेके नाम ३–एकधुरीण १ एकधुर २ एकधुरावह ३ ॥ ६५ ॥

स तु सर्वधुरीणः स्याद्यो वै सर्वधुरावहः

जो सब बोझा ले चले उसके नाम २–सर्वधुरीण १ सर्वधुरावह २ ॥

माहेयी सौरभेयी गौरुस्रा माता च शृङ्गिणी ॥ ६६ ॥ अर्जुन्यया रोहिणी स्यात्—

गायके नाम ९–माहेयी १ सौरभेयी २ गो ३ उस्रा ४ माता ५ शृंगिणी ६ ॥ ६६ ॥ अर्जुनी ७ अघ्न्या ८ रोहिणी ९ ॥

उत्तमा गोषु नैचिकी ।

अच्छी गायका नाम १–नैचिकी १ ॥

वर्णादिभेदात्संज्ञाः स्युः शबलीधवलादयः ॥ ६७ ॥

चितकबरीका नाम १–शबली १ ॥ सफेद का नाम १–धवला १ ॥ ६७ ॥

द्विहायनी द्विवर्षा गौ—

दो वर्षकी गायके नाम २–द्विहायनी १ द्विवर्षा२

—रेकाब्दा त्वेकहायनी।

एकवर्षवालीके नाम २–एकाब्दा १ एकहायनी२।

चतुरब्दा चतुर्हाय—

चार वर्षकीके नाम २–चतुरब्दा १ चतुर्हायणी२

–ण्येवं त्र्यब्दा त्रिहायणी ॥ ६८ ॥

तीन वर्षकी गौके नाम २–त्र्यब्दा १ त्रिहायणी २ ॥ ६८ ॥

वशा वन्ध्या—

बांझके नाम २–वशा १ वन्ध्या २ ॥

—ऽवतोका तु स्रवद्गर्भा

जिसका अकस्मात् गर्भ गिर गया हो उस गायनाम २–अवतोका १ स्रवद्गर्भा २ ॥

—थ सन्धिनी । आक्रान्ता वृषभेणा—

बैलके साथ लगाई हुई गायका नाम १–सन्धिनी १ ॥

–थ वेहद्गर्भोपघातिनी ॥ ६९ ॥

बलके सयोगसे गर्भको गिरा देनेवाली गायके नाम २–वेहत् १ गर्भोपघातिनी २ ॥ ६९ ॥

काल्योपसर्या प्रजने—

जिसको गर्भ धारण करनेका समय हो उसका नाम १–उपसर्य्या १ ॥

–प्रष्ठौही बालगर्भिणी ।

महलौनका नाम १–प्रष्ठौही १ ॥

स्यादचण्डी तु सुकरा–

सूधी गौके नाम २—अचण्डी १ सुकरा २ ॥

—बहुसूतिः परेष्टुका ॥ ७० ॥

बहुत दफे ब्याई हुईके नाम २–बहुसूति १ परेष्टुका २ ॥ ७० ॥

चिरप्रसूता बष्कयिणी—

बकेन (बहुत दिनोंमे ब्यानेवाली) गायके नाम २–चिरप्रसूता १ बष्कयिणी २ ॥

–धेनुः स्यान्नवसूतिका ॥

नई ब्याई हुईके नाम २–धेनु १ नवसूतिका २॥

सुव्रता सुखसन्दोह्या–

जो सरलतासे दुही जाय उस गायके नाम २–सुव्रता १ सुखसन्दोह्या २ ॥

पीनोध्नी पीवरस्तनी ॥ ७१ ॥

बड़े आयनवालीके नाम २–पीनोध्नी १ पीवरस्तनी २ ॥ ७१ ॥

द्रोणक्षीरा द्रोणदुग्धा—

द्रोण (१२ सेर) दूध देनेवालीके नाम २–द्रोणक्षीरा १ द्रोणदुग्धा २ ॥

धेनुष्या बन्धके स्थिता ।

गिरवी रक्खी हुईका नाम १–धेनुष्या १ ॥

समांसमीना सा यैव प्रतिवर्षं प्रसूयते ॥ ७२ ॥

प्रतिवर्ष ब्यानेवाली गौका नाम १–समांसमीना १ ॥७२ ॥

ऊधस्तु क्लीबमापीनं–

आयन (औहडी) के नाम २–ऊधस् १ आपीन २ ॥

समौ शिपककीलकौ ।

खूंटेके नाम २–शिवक १ कीलक २ ॥

न पुंसि दाम सन्दानं–

दुहनेके समय पांव बांधनेकी रस्सीके नाम २–दामन् १ सन्दान २ ॥

—पशुरज्जुस्तु दामनी ॥ ७३ ॥

पशु बांधनेकी रस्सीके नाम २–पशुरज्जु १ दामनी २ ॥ ७३ ॥

वैशाखमन्थमन्थानमन्थानोमन्थदण्डके–

मथनेका दंडा अर्थात रईके नाम ५–वैशाख १ मन्थ २ मन्थान ३ मथिन् ४ मन्थदण्डक ५ ॥

कुठरो दण्डविष्कम्भो–

जिसमें रई बांधी जाय उस काष्ठके नाम २–कुठर १ दण्डविष्कम्भ २ ॥

–मन्थनी गर्गरी समे ॥ ७४ ॥

मथनेके पात्रके नाम २--मन्थनी १ गर्गरी २ ॥ ७४ ॥

उष्ट्रे क्रमेलकमयमहांगाः-

ऊँटके नाम ४- उष्ट्र १ क्रमेलक २ मय ३ महांग ४ ॥

करभः शिशुः ।

ऊँटके बच्चेके नाम २-करभ १ शिशु २ ॥

करभाः स्युः शृङ्खलका दारवैः पादबन्धनैः ॥ ७५ ॥

काठसे पैर बंधे हुए बच्चेका नाम १-शृङ्खलक १ ॥ ७५ ॥

अजा छागी—

बकरीके नाम २-अजा १ छागी २ ॥

शुभच्छागवस्तच्छगलका अजे ।

बकरेके नाम ५--शुभ १ छाग २ वस्त ३ छागलक ४ अज ५ ॥

मेढ़ोरभ्रोरणोर्णायुमेषवृष्ण्यय एडके ॥ ७६ ॥

मेंढेके नाम ७--मेढ १ उरभ्र २ उरण ३ ऊर्णायु ४ मेष ५ वृष्णि ६ एडक ७ ॥ ७६ ॥

उष्ट्रोरभ्राजवृन्दे स्यादौष्ट्रकौरभ्रकाजकम् ।

ऊंटोंके समूहका नाम १-औष्टक १ ॥ मेढ़ोंके समूहका नाम १ -औरभ्रक १ ॥ अजों (बकरों)के समूहका नाम १--आजक १ ॥

चक्रीवन्तस्तु बालेया रासभा गर्दभाः खराः ॥ ७७ ॥

गधेके नाम ५--चक्रीवत् १ बालेय २ रासभ ३ गर्दभ ४ खर ५ ॥ ७७ ॥

वैदेहकः सार्थवाहो नैगमो वाणिजो वणिक् । पण्याजीवो ह्यापणिकः क्रयविक्रयिकश्च सः ॥ ७८ ॥

व्यापारीके नाम ८--वैदेहक १ सार्थवाह २ नैगम ३ वाणिज ४ वणिज् ५ पण्याजीव ६ आपणिक ७ क्रयविक्रयिक ८ ॥ ७८ ॥

विक्रेता स्याद्विक्रयिकः—

बेचनेवालेके नाम २-विक्रेतृ १ विक्रयिक २ ॥

क्रायिकक्रयिकौ समौ ।

मोल लेनेवालेके नाम २-क्रायिक १ क्रयिक २॥

वाणिज्यं तु वणिज्या स्या—

व्यापारके नाम २-वाणिज्य १ वणिज्या २ ॥

न्मूल्यं वस्नोऽत्यवक्रयः ॥ ७९ ॥

मोलके नाम ३-मूल्य १ वस्न २ अवक्रय ३ ॥ ७९ ॥

नीवी परिपणो मूलधनं-

मूलधनके नाम ३-नीवी १ परिपण २ मूलधन ३ ॥

—लाभोऽधिकं फलम् ।

नफेके नाम ३-लाभ १ अधिक २ फल ३ ॥

परिदानं परीवर्तो नैमेयनिमयावपि ॥ ८० ॥

अदले बदलेके नाम ४-परिदान १ परीवर्त्त २ नैमेय ३ निमय ४ ॥ ८० ॥

पुमानुपनिधिर्न्यासः—

धरोहरके नाम २-उपनिधि १ न्यास २ ॥

—प्रतिदानं तदर्पणम् ।

धरोहर लौटा देनेके नाम २-प्रतिदान १ तदर्पण २ ॥

क्रये प्रसारितं क्रय्यं—

बेचनेके अर्थ दुकानमें रक्खी हुई वस्तुका नाम १-क्रय्य १ ॥

—क्रेयं क्रेतव्यमात्रके ॥ ८१ ॥

दूकानपर रखने योग्य वस्तुका नाम १-क्रेय १ ॥ ८१ ॥

विक्रेयं पणितव्यं च पण्यं—

बेचने योग्य वस्तुके नाम ३–विक्रेय १ पणितव्य २ पण्य ३ ॥

—क्रय्यादयस्त्रिषु ।

क्रय्य आदि शब्द तीनों लिंगोंमें होते हैं ॥

क्लीबे सत्यापनं सत्यङ्कारः सत्याकृतिः स्त्रियाम् ॥ ८२ ॥

साई अर्थात् बयानेके नाम ३–सत्यापन १ सत्यङ्कार २ सत्याकृति ३ ॥ ८२ ॥

विपणो विक्रयः—

बेचनेके नाम २–विपण १ विक्रय २ ॥

–संख्याः संख्येये द्वादश त्रिषु ।

एकसे अष्टादश पर्यन्त संख्या गिनने योग्य वस्तुमें रहती है और वह संख्या शब्द संख्येय शब्दवत् तीनों लिङ्गोंमें होती है ॥

विंशत्याद्याः सदैकत्वे सर्वाःसंख्येयसंख्ययोः ॥ ८३ ॥

विंशति (बीस) आदि सम्पूर्ण संख्या (गिनती) और संख्येय अर्थात् गिनने योग्य वस्तुमें रहती है और विंशति आदि शब्द सदा एकवचन होते हैं ॥ ८३ ॥

संख्यार्थे द्विबहुत्वे स्त–

केवल गिनती अर्थवाले विंशति आदि शब्द द्विवचन और बहुवचनमें होते हैं ॥

—स्तासु चानवतेः स्त्रियः ।

विंशति आदि नवतिपर्यन्त शब्द स्त्रीलिंग होते हैं ॥

पंक्तेः शतसहस्रादि क्रमाद्दशगुणोत्तरम् ॥ ८४ ॥

दश संख्याका क्रमसे उत्तरोत्तर दश गुण शत सहस्र आदि संख्याएँ होती हैं ॥ ८४ ॥

यौतवं द्रुवयं पाय्यमिति मानार्थकं त्रयम् ।

तोलके नाम ३–यौतव १ द्रुवय २ पाय्य ३ ॥

मानं तुलाऽङ्गुलिप्रस्थै–

(तोल तीन प्रकारकी है) तुलामान १ अंगुलिमान २ प्रस्थमान ३ ॥

—गुञ्जाः पञ्चाद्यमाषकः ॥ ८५ ॥

पांच रतीका शास्त्रोक्त माषा (मासा) होता है ॥ ८५ ॥

ते षोडशाक्षः कर्षोऽस्त्री–

सोलह मासेका एक अक्ष होता है उसको ही कर्ष कहते हैं ॥

—पलं कर्षचतुष्टयम् ।

चार कर्षका एक पल होता है ॥

सुवर्णबिस्तौ हेम्नोऽक्ष–

कर्षभर सुवर्णके नाम २–सुवर्ण १ बिस्त २ ॥

—कुरुबिस्तस्तु तत्पले ॥ ८६ ॥

पलभर सुवर्णका नाम १–कुरुबिस्त १ ॥ ८६ ॥

तुला स्त्रियां पलशत–

सौ पलका नाम १–तुला १ ॥

—भारः स्याद्विंशतिस्तुलाः ।

बीस तुलाका नाम १–भार १ ॥

आचितो दश भाराः स्युः–

दश भारका नाम १–आचित १ ॥

–शाकटो भार आचितः ॥ ८७ ॥

शकटभर भारका नाम १–आचित १ ॥ ८७ ॥

कार्षापणः कार्षिकः स्यात्—

चांदीके रुपयेके नाम २–कार्षापण १ कार्षिक २।

–कार्षिके ताम्रिके पणः ।

तांबेका कार्षापण अर्थात् पैसेका नाम १–पण १

अस्त्रियामाढकद्रोणौ खारी वाहो निकुञ्चकः ॥ ८८ ॥ कुडवः प्रस्थ इत्याद्याः परिमाणार्थकाः पृथक् ।

चार सेरका नाम १–आढक १ ॥ आठ आढकका नाम–द्रोण १ ॥ तीन द्रोणका नाम–खारी १ ॥ आठ द्रोणका नाम–वाह १ ॥ मुट्ठीभरका नाम–निकुंचक १ ॥ ८८ ॥ पावभरका नाम–कुडव १ ॥

सेरभरका नाम-प्रस्थ १ ॥ इत्यादि अलग अलग तोलके नाम हैं ॥

पादस्तुरीयो भागः—

चौथे भागका नाम १-पाद १ ॥

—दंशभागौ तु वण्टके ॥ ८९ ॥

वाट अर्थात् भागके नाम ३-अंश १ भाग २ वंटक ३ ॥ ८९ ॥

द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु । हिरण्यं द्रविणं द्युम्नमर्थरैविभवा अपि ॥ ९० ॥

धनके नाम १३-द्रव्य १ वित्त २ स्वापतेय ३ रिक्थ ४ ऋक्थ ५ धन ६ वसु ७ हिरण्य ८ द्रविण ९ द्युम्न १० अर्थ ११ रै १२ विभव १३ ॥ ९० ॥

स्यात्कोषश्च हिरण्यं च हेमरूप्ये कृताकृते ।

गढ़े वा नहीं गढ़े हुए सोने वा चांदीके नाम २-हिरण्य १ कोष २ ॥

ताम्र्यां यदन्यत्तत्कुप्यं—

सोने चांदीसे अन्य ताम्रादि धातुका नाम १-कुप्य १ ॥

—रूप्यंतद्द्वयमाहतम् ॥ ९१ ॥

तांबा और चांदीके मिलाये हुएका नाम १—रूप्य १ ॥ ९१ ॥

गारुत्मतं मरकतमश्मगर्भो हरिन्मणिः

मरकतमणिके नाम ४-गारुत्मत १ मरकत २ अश्मगर्भ ३ हरिन्मणि ४ ॥

शोणरत्नं लोहितकः पद्मरागो—

पद्मरागमणिके नाम ३-शोणरत्न १ लोहितक २ पद्मराग ३ ॥

—ऽथ मौक्तिकम् ॥ ९२ ॥ मुक्ता—

मोतीके नाम २-मौक्तिक १ ॥ ९२ ॥ मुक्ता२।

ऽथ विद्रुमः पुंसि प्रवालं पुनपुंसकम् ।

मूंगेके नाम २-विद्रुम १ प्रवाल २ ॥

रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपि च ॥ ९३ ॥

पद्मराग आदि पाषाण जाति और मुक्ताफल आदिके नाम २-रत्न १ मणि २ ॥ ९३ ॥

स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम् । तपनीयं शातकुम्भं गांगेयं भर्म कर्बुरम् ॥ ९४ ॥ चामीकरं जातरूपं महारजतकाञ्चने । रुक्मं कार्तस्वरं जाम्बूनदमष्टापदोऽस्त्रियाम् ॥ ९५ ॥

सुवर्णके नाम १९ स्वर्ण १ सुवर्ण २ कनक ३ हिरण्य ४ हेमन् ५ हाटक ६ तपनीय ७ शातकुम्भ ८ गांगेय ९ भर्म्मन् १० कर्बुर ११ ॥९४॥ चामीकर १२ जातरूप १३ महारजत १४ कांचन १५ रुक्म १६ कार्त्तस्वर १७ जांबूनद १८ अष्टापद १९ ॥ ९५ ॥

अलंकारसुवर्णं यच्छृङ्गीकनकमित्यदः ।

सुवर्णके गहनेका नाम १-शृंगीकनक १ ॥

दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि ॥ ९६ ॥

चांदीके नाम ५-दुर्वर्ण १ रजत २ रूप्य खर्जूर ४ श्वेत ५ ॥ ९६ ॥

रीतिः स्त्रियामारकूटो न स्त्रिया—

पीतलके नाम २-रीति १ आरकूट २ ॥

—मथ ताम्रकम् । शुल्वं म्लेच्छमुखं द्व्यष्टवरिष्ठोदुम्बराणि च ॥ ९७ ॥

तांबेके नाम ६-ताम्रक १ शुल्व २ म्लेच्छमुख ३ द्व्यष्ट ४ वरिष्ठ ५ उदुंबर ६ ॥ ९७ ॥

लोहोऽस्त्री शस्त्रकं तीक्ष्णं पिण्डं कालायसायसी । अश्मसारो—

लोहेके नाम ७-लोह १ शस्त्रक २ तीक्ष्ण ३ पिण्ड ४ कालायस ५ अयस् ६ अश्मसार ७ ॥

—थ मण्डूरं सिंहाणमपि तन्मले॥९८॥

लोहेके मल अर्थात् मंडूरके नाम २-मण्डूर १ सिंहाण २ ॥ ९८ ॥

सर्वं च तैजसं लोहं—

चांदी सोना लोहादि सर्व धातुओंका नाम १–लोह १ ॥

विकारस्त्वयसः कुशी ।

लोहके फालका नाम १–कुशी १ ॥

क्षारः काचो—

कांचके नाम २–क्षार १ काच २ ॥

—ऽथ चपलो रसः सूतश्च पारदे ॥९९॥

पारेके नाम ४–चपल १ रस २ सूत ३ पारद ४ ॥ ९९ ॥

गवलं माहिषं शृङ्ग—

भैंसेके सींगका नाम १–गवल १ ॥

—मभ्रकं गिरिजामले ।

अबरखके नाम ३–अभ्रक १ गिरिज २ अमल ३ ॥

स्रोतोऽञ्जनं तु सौवीरं कापोताञ्जनयामुने ॥ १०० ॥

सुर्माके नाम ४—स्रोतोऽजन १ सौवीर २ कापोतांजन ३ यामुन ४ ॥ १०० ॥

तुत्थाञ्जनं शिखिग्रीवं वितुन्नकमयूरके ।

तूतिया (नीलाथोथा) के नाम ४–तुत्थाञ्जन १ शिखिग्रीव २ वितुन्नक ३ मयूरक ४ ॥

कर्परी दार्विका क्वाथोद्भवं तुत्थं—

तूतियाके भेद ३–कर्परी १ दार्विका २ तुत्थ ३॥

—रसाञ्जनम् ॥ १०१ ॥ रसगर्भं तार्क्ष्यशैलं–

रसोतके नाम ३–रसाञ्जन १ ॥ १०१ ॥ रसगर्भ २ तार्क्ष्यशैल ३ ॥

—गन्धाश्मनि तु गन्धिकः । सौगन्धिकश्च–

गन्धकके नाम ३–गन्धाश्मन् १ गन्धिक २ सौगन्धिक ३ ॥

—चक्षुष्याकुलाल्यौ तु कुलत्थिका ॥ १०२ ॥

काले सुर्मेके नाम ३–चक्षुष्या १ कुलाली २ कुलत्थिक ३ ॥ १०२ ॥

रीतिपुष्पं पुष्पकेतु पौष्पकं कुसुमाञ्जनम् ।

पीतलको तपाके घिसनेसे जो अंजन बने उसके नाम ४–रीतिपुष्प १ पुष्पकेतु २ पौष्पक ३ कुसुमांजन ४ ॥

पिञ्जरं पीतनं तालमालं च हरितालके ॥ १०३ ॥

हरितालके नाम ५–पिञ्जर १ पीतन २ ताल ३ आल ४ हरितालक ५ ॥ १०३ ॥

गैरेयमर्थ्यं गिरिजमश्मजं च शिलाजतु

शिलाजीतके नाम ५–गैरेय १ अर्थ्य २ गिरिज ३ अश्मज ४ शिलाजतु ५ ॥

बोलगन्धरसप्राणपिंडगोपरसाः समाः ॥ १०४ ॥

गन्धरसके नाम ५–बोल १ गन्धरस २ प्राण ३ पिण्ड ४ गोपरस ५ ॥ १०४ ॥

डिण्डीरोऽब्धिकफः फेनः–

समुद्रके झागके नाम ३–डिंडीर १ अब्धिकफ २ फेन ३ ॥

सिन्दूरं नागसंभवम् ।

सिंदूरके नाम २–सिंदूर १ नागसम्भव २ ॥

नागसीसकयोगेष्टवप्राणि–

सीसेके नाम ४—नाग १ सीसक २ योगेष्ट ३ वप्र ४ ॥

—त्रपु पिच्चटम् ॥ १०५ ॥ रङ्गवङ्गे–

रांगके नाम ४–त्रपु १ पिच्चट २ ॥ १०५ ॥ रङ्ग ३ वंग ४ ॥

—अथ पिचुस्तूलो—

रुईके नाम २–पिचु १ तूल २ ॥

-ऽथ कमलोत्तरम्। स्यात्कुसुम्भं वह्निशिखं महारजनमित्यपि ॥ १०६ ॥

कुसुम्भके नाम ४-कमलोत्तर १ कुसुम्भ २ वह्निशिख ३ महारजन ४ ॥ १०६ ॥

मेषकम्बल ऊर्णायुः-

ऊनी कम्बलके नाम २-मेषकम्बल १ ऊर्णायु २।

शशोर्णं शशलोमनि।

खरगोशकी ऊनके नाम २—शशोर्ण १ शशलोमन् २ ॥

मधु क्षौद्रं माक्षिकादि-

शहदके नाम ३—मधु १ क्षौद्र २ माक्षिक ३ ॥

-मधूच्छिष्टं तु सिक्थकम् ॥ १०७ ॥

मोमके नाम २—मधूच्छिष्ट १ सिक्थक २ ॥ १०७ ॥

मनःशिला मनोगुप्ता मनोह्वा नागजिह्विका। नैपाली कुनटी गोला-

मैनशिलके नाम ७—मनःशिला १ मनोगुप्ता २ मनोह्वा ३ नागजिह्विका ४ नैपाली ५ कुनटी ६ गोला ७ ॥

-यवक्षारो यवाग्रजः ॥ १०८ ॥ पाक्यो-

जवाखारके नाम ३-यवक्षार १ यवाग्रज २ ॥ १०८ ॥ पाक्य ३ ॥

-ऽथ सर्जिकाक्षारः कापोतः सुखवर्चकः। सौवर्चलं स्याद्रुचकं-

सज्जीके नाम ५—सर्जिकाक्षार १ कापोत २ सुखवर्चक ३ सौवर्चल ४ रुचक ५ ॥

-त्वक्क्षीरी वंशरोचना ॥ १०९ ॥

वंशलोचनके नाम २-त्वक्क्षीरी १ वंशरोचना २ ॥ १०९ ॥

शिग्रुजं श्वेतमरिचं-

सफेद मिर्चके नाम २-शिग्रुज १ श्वेतमरिच २।

मोरटं मूलमैक्षवम्।

ईखकी जड़का नाम १-मोरट १ ॥

ग्रन्थिकं पिप्पलीमूलं चटकाशिर इत्यपि ॥ ११० ॥

पीपलामूलके नाम ३—ग्रंथिक १ पिप्पलीमूल २ चटकाशिरस् ३ ॥ ११० ॥

गोलोमी भूतकेशो ना—

जटामांसीके नाम २-गोलोमी १ भूतकेश २ ॥

पत्राङ्गं रक्तचन्दनम्।

पतंगके नाम २—पत्रांग १ रक्तचन्दन २ ॥

त्रिकटु त्र्यूषणं व्योषं-

सोंठि, पीपल, मिर्च इन तीनोंके समूहके नाम ३—त्रिकटु १ त्र्यूषण २ व्योष ३ ॥

—त्रिफला तु फलत्रिकम् ॥ १११ ॥

आंवला, हरड़, बहेडा इन तीनोंके समूहके नाम २-त्रिफला १ फलत्रिक २ ॥ १११ ॥

इति वैश्यवर्गः ॥ ९ ॥

अथ शूद्रवर्गः १०.

शूद्राश्चावरवर्णाश्च वृषलाश्च जघन्यजाः।

शूद्रके नाम ४-शूद्र १ अवरवर्ण २ वृषल ३ जघन्यज ४ ॥

आचण्डालात्तु सङ्कीर्णा अम्बष्ठकरणादयः ॥ १ ॥

ब्राह्मणीमें शूद्रसे उत्पन्न हो उसका नाम-चण्डाल ॥ चण्डालसे लेकर अम्बष्ठ करण आदिकोंका नाम १-संकीर्ण १ ॥ १ ॥

शूद्राद्विशोस्तु करणो—

शूद्रामें वैश्यसे उत्पन्न हुएका नाम १-करण १।

-ऽम्बष्ठो वैश्यादिजन्मनोः।

बनैनीमें ब्राह्मणसे उत्पन्न हो उसका नाम १-अम्बष्ठ १ ॥

शूद्रात्क्षत्रिययोरुग्रो-

शूद्रामें क्षत्रियसे उत्पन्न हुएका नाम १-उग्र १।

—मागधः क्षत्रियाद्विशोः ॥ २ ॥

क्षत्रियाणीमें वैश्यसे उत्पन्न हुएका नाम–१ मागध १ ॥ २ ।

माहिष्योऽर्याक्षत्रिययोः—

बनैनीमें क्षत्रियसे उत्पन्न हुएका नाम १–माहिष्य १ ॥

–क्षत्ताऽर्याशूद्रयोः सुतः ।

बनैनीमें शूद्रसे उत्पन्न हुएका नाम १–क्षत्तृ १ ॥

ब्राह्मण्यां क्षत्रियात्सूत—

ब्राह्मणीमें क्षत्रियसे उत्पन्न हुएका नाम १–सूत १

स्तस्यां वैदेहको विशः ॥ ३ ॥

ब्राह्मणीमें वैश्यसे उत्पन्न हुएका नाम १–वैदेहक १ ॥ ३ ॥

रथकारस्तु माहिष्यात्करण्यां यस्य संभवः ।

करणीमें माहिष्यसे उत्पन्न हुएका नाम १–रथकार १ ॥

स्याच्चण्डालस्तु जनितो ब्राह्मण्यां वृषलेन यः ॥ ४ ॥

ब्राह्मणीमें शूद्रसे उत्पन्न हुएका नाम १–चण्डाल १ ॥ ४ ॥

कारुः शिल्पी—

कारीगरोंके नाम २–कारु १ शिल्पिन् २ ॥

–संहतैस्तैर्द्वयोः श्रेणिः सजातिभिः ।

कारीगरोंके समूहका नाम १–श्रेणि १ ॥

कुलकः स्यात्कुलश्रेष्ठी—

कारीगरोंके अफसर अर्थात् मिस्तरीके नाम २–कुलक १ कुलश्रेष्ठी २ ॥

–मालाकारस्तु मालिकः ॥ ५ ॥

मालीके नाम २–मालाकार १ मालिक २ ॥५॥

कुम्भकरः कुलालः स्यात्—

कुम्हारके नाम २–कुम्भकार १ कुलाल २ ॥

—पलगण्डस्तु लेपकः ।

कमंगरके नाम २–पलगण्ड १ लेपक २ ॥

तन्तुवायः कुविन्दः स्यात्–

जुलाहेके नाम २–तन्तुवाय १ कुविन्द २ ॥

तुन्नवायस्तु सौचिकः ॥ ६ ॥

दरजीके नाम २–तुन्नवाय १ सौचिक २ ॥६॥

रङ्गाजीवश्चित्रकरः—

चित्रकारके नाम २–रङ्गाजीव १ चित्रकर २ ॥

—शस्त्रमार्जोऽसिधावकः ॥

शिकिलीगरके नाम २–शस्त्रमार्ज १ असिधावक २ ॥

पादूकृच्चर्मकारः स्या—

चमारके नाम २–पादूकृत् १ चर्मकार २ ॥

–द्व्योकारो लोहकारकः ॥ ७ ॥

लोहारके नाम २–व्योकार १ लोहकारक २ ॥७॥

नाडिन्धमः स्वर्णकारः कलादो रुक्मकारकः ।

सुनारके नाम ४–नाडिन्धम १ स्वर्णकार २ कलाद ३ रुक्मकारक ४ ॥

स्याच्छाङ्खिकः काम्बविकः—

मनिहारके नाम २ शाङ्खिक १ काम्बविक २।

–शौल्विकस्ताम्रकुट्टकः ॥ ८ ॥

ठठेरेके नाम २–शौल्विक १ ताम्रकुट्टक २ ॥८॥

—तक्षा तु वर्धकिस्त्वष्टा रथकारस्तु काष्ठतट् ।

बढ़ईके नाम ५–तक्षन् १ वर्धकी २ त्वष्टृ ३ रथकार ४ काष्ठतक्ष् ५ ॥

ग्रामाधीनो ग्रामतक्षः—

गांवके बढ़ईके नाम २–ग्रामाधीन १ ग्रामतक्ष २ ॥

–कौटतक्षोऽनधीनकः ॥ ९ ॥

स्वतन्त्र बढ़ईका नाम १-कौटतक्ष १ ॥ ९ ॥

क्षुरी मुण्डी दिवाकीर्तिर्नापितान्तावसायिनः।

नाईके नाम ५-क्षुरिन् १ मुण्डिन् २ दिवाकीर्ति ३ नापित ४ अन्तावसायिन् ५ ॥

निर्णेजकः स्याद्रजकः—

धोबीके नाम २-निर्णेजक १ रजक २ ॥

—शौण्डिको मण्डहारकः ॥ १० ॥

कलालके नाम २—शौण्डिक १ मण्डहारक २ ॥ १० ॥

जाबालः स्यादजाजीवो—

गढ़रियेके नाम २-जाबाल १ अजाजीव २ ॥

-देवाजीवस्तु देवलः।

पण्डाके नाम २-देवाजीव १ देवल २ ॥

स्यान्माया शाम्बरी—

इन्द्रजालके नाम २-माया १ शांबरी २ ॥

-मायाकारस्तु प्रतिहारकः ॥११॥

इन्द्रजाली अर्थात् वाजीगरके नाम २-मायाकार १ प्रतिहारक २ ॥ ११ ॥

शैलालिनस्तु शैलूषा जायाजीवाः कृषाश्विनः। भरता इत्यपि नटा—

नटके नाम ६-शैलालिन् १ शैलूष २ जायाजीव ३ कृशाश्विन् ४ भरत ५ नट ६ ॥

श्वारणास्तु कुशीलवाः ॥ १२ ॥

कत्थकके नाम २-चारण १ कुशीलव २ ।१२॥

मिर्दंगिका मौरजिकाः—

मृदङ्गके बजानेवालेके नाम २—मार्दंगिक १ मौरजिक २ ॥

—पाणिवादास्तु पाणिघाः।

ताली बजानेवालेके नाम २—पाणि १ पाणिघ २ ॥

वेणुध्माः स्युर्वैणविका-

बांसुरी बजानेवालेके नाम २—वेणुध्म १ वैणविक २ ॥

-वीणावादास्तु वैणिकाः ॥ १३ ॥

वीणा बजानेवालेके नाम २—वीणावाद १ वैणविक २ ॥ १३ ॥

जीवान्तकः शाकुनिको-

चिड़ीमारके नाम २-जीवान्तक १ शाकुनिक२।

-द्वौ वागुरिकजालिकौ।

व्याधके नाम २-वागुरिक १ जालिक २ ॥

वैतंसिकः कौटिकश्च मांसिकश्च समं त्रयम् ॥ १४ ॥

कसाईके नाम ३—वैतंसिक १ कोटिक २ मांसिक ३ ॥ १४ ।

भृतको भृतिभुक्कर्मकरो वैतनिकोऽपि सः।

मजूरके नाम ४—भृतक १ भृतिभुज् २ कर्मकर ३ वैतनिक ४ ॥

वार्तावहो वैवधिको—

दूतके नाम २-वार्तावह १ वैवधिक २ ॥

—भारवाहस्तु भारिकः ॥ १५ ॥

बोझा ढोनेवालेके नाम २—भारवाह १ भारिक २ ॥ १५ ॥

विवर्णः पामरो नीचः प्राकृतस्तु पृथग्जनः। निहीनोऽपसदो जाल्मः क्षुल्लकश्चेतरश्च सः ॥१६॥

नीचके नाम १०-विवर्ण १ पामर २ नीच ३ प्राकृत ४ पृथग्जन ५ निहीन ६ अपसद ७ जाल्म ८ क्षुल्लक ९ इतर १० ॥ १६ ॥

भृत्ये दासेरदासेयदासगोप्यकचेटकाः। नियोज्यकिंकरप्रैष्यभुजिष्यपरिचारकाः १७

दास वा टहलुएके नाम ११—भृत्य १ दासेर २ दासेय ३ दास ४ गोप्यक ५ चेटक ६ नियोज्य ७ किंकर ८ प्रैष्य ९ भुजिष्य १० परिचारक ११ ॥ १७ ॥

पराचितपरिस्कंदपरजातपरैधिताः ।

जो दूसरेसे पाला जाय उसके अर्थात् रहुआके नाम ४—पराचित १ परिस्कन्द २ परजात ३ परैधित ४ ॥

मंदस्तुंदपरिमृज आलस्यः शीतकोऽलसोऽनुष्णः ॥ १८ ॥

आलसीके नाम ६—मन्द १ तुन्दपरिमृज २ आलस्य ३ शीतक ४ अलस ५ अनुष्ण ६ ॥ १८॥

दक्षे तु चतुरपेशलपटवः सूत्थान उष्ण

चतुरके नाम ६—दक्ष १ चतुर २ पेशल ३ पटु ४ सूत्थान ५ उष्ण ६ ॥

चण्डालप्लवमातंगदिवाकीर्तिजनंगमाः ॥ १९ ॥ निषादश्वपचावंतेवासिचाण्डालपुक्कसाः ।

चाण्डालके नाम १०—चण्डाल १ प्लव २ मातङ्ग ३ दिवाकीर्ति ४ जनंगम ५ ॥ १९ ॥ निषाद ६ श्वपच ७ अन्तेवासिन् ८ चाण्डाल ९ पुक्कस १० ॥

भेदाः किरातशबरपुलिंदा म्लेच्छजातयः ॥ २० ॥

म्लेच्छजातिके भेद जंगली गोमांस खानेवाले हेबूढे आदिके नाम ३—किरात १ शबर २ पुलिन्द ३ ॥ २० ॥

व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः ।

मृग पकड़नेवालेके नाम ४—व्याध १ मृगवधाजीव २ मृगयु ३ लुब्धक ४ ॥

कौलेयकः सारमेयः कुक्कुरो मृगदंशकः ॥ २१ ॥ शुनको भषकः श्वा स्था-

कुत्तेके नाम ७—कौलेयक १ सारमेय २ कुक्कुर ३ मृगदंशक ४ ॥ २१ ॥ शुनक ५ भषक ६ श्वन् ७ ॥

—वलर्कस्तु स योगितः ।

प्रयोगसे उन्मत्त हुए कुत्तेका नाम १—अलर्क १

श्वा विश्वकद्रुर्मृगयाकुशलः—

शिकारी कुत्तेका नाम १—विश्वकद्रु १ ॥

सुरमा शुनी ॥ २२ ॥

कुतियाके नाम २—सरमा १ शुनी २ ॥ २२ ॥

विट्चरः सूकरो ग्राम्यो—

गांवके सूकरका नाम १—विट्चर १ ॥

वर्करस्तरुणः पशुः ।

तरुणपशुका नाम १—वर्कर १ ॥

आच्छोदनं मृगव्यं स्यादाखेटा मृगया स्त्रियाम् ॥ २३ ॥

शिकारके नाम ४—आच्छोदन १ मृगव्य २ आखेट ३ मृगया ४ ॥ २३ ॥

दक्षिणारुर्लुब्धयोगाद्दक्षिणेर्माकुरङ्गकः॥

व्याधने जिस मृगके दहिने अंगमें मारा हो उसका नाम १—दक्षिणेर्मन् १ ॥

चौरैकागारिकस्तेनदस्युतस्करमोचकाः ॥ २४ ॥ प्रतिरोधिपरास्कन्दिपाटच्चरमलिम्लुचाः ।

चोरके नाम १०—चौर १ ऐकागारिक २ स्तेन ३ दस्यु ४ तस्कर ५ मोषक ६ ॥ २४ ॥ प्रतिरोधिन् ७ परास्कन्दिन् ८ पाटच्चर ९ मलिम्लुच १०।

चौरिका स्तैन्यचौर्यं च स्तेयं—

चोरीके नाम ४—चौरिका १ स्तैन्य २ चौर्य ३ स्तेय ४ ॥

—लोप्त्रं तु तद्धने ॥ २५ ॥

चोरीके मालका नाम १—लोप्त्र १ ॥ २५ ॥

वीतंसस्तूपकरणं बन्धने मृगपक्षिणाम् ।

पक्षी वा मृगोंके पकड़नेकी सामग्री अर्थात् जालादिका नाम १—वीतंस १ ॥

उन्माथः कूटयन्त्रं स्या-

काबकपींजरे आदिके नाम २—उन्माथ १ कूटयन्त्र २ ॥

द्वागुरा मृगबन्धनी ॥ २६ ॥

जालके नाम २-वागुरा १ मृगबन्धनी २ ।२६॥

शुल्वं वराटकं स्त्रीं तु रज्जुस्त्रिषु वटी गुणः।

रस्सीके नाम ५-शुल्व १ वराटक २ रज्जु ३ वटी ४ गुण ५ ॥

उद्घाटनं घटीयन्त्रं सलिलोद्वाहनं प्रहेः ॥ २७ ॥

अरहटके नाम २-उद्घाटन १ घटीयन्त्र २ २७।

पुंसि वेमा वायदण्डः-

जुलाहेके कपड़ा बुननेके औजारके नाम २—वेमन् १ वायदण्ड २ ॥

सूत्राणि नरि तन्तवः।

सूतके नाम २-सूत्र १ तन्तु २ ॥

वाणिर्व्यूतिः स्त्रियौ तुल्ये—

कपड़े आदिके बुननेके नाम २-वाणि १ व्यूति २ ॥

पुस्तं लेप्यादिकर्मणि ॥ २८ ॥

मिट्टी आदिसे लीपने पोतनेका नाम १—पुस्त १ ॥ २८ ॥

पाञ्चालिका पुत्रिका स्याद्वस्त्रदन्तादिभिः कृता।

गुड़िया अर्थात् वस्त्रकी बनाई हुई पुतलीके नाम २-पांचालिका १ पुत्रिका २ ॥

जतुत्रपुविकारे तु जातुषं त्रापुषं त्रिषु।

लाखके विकारका नाम १-जातुष १ ॥ वंगके विकारका नाम १-त्रापुष १ ॥

पिटकः पेटकः पेटा मंजूषा—

पिटारेके नाम ४-पिटक १ पेटक २ पेटा ३ मंजूषा ४ ॥

—ऽथ विहङ्गिका ॥ २९ ॥ भारयष्टि—

बहँगी (खूँटी) के नाम २-विहंगिका १ ॥ २९ ॥ भारयष्टि २ ॥

—स्तदालंबि शिक्यं काचो—

बहँगीके छीकेके नाम २-शिक्य १ काच २ ॥

-ऽथ पादुका। पादूरुपानत्स्त्री—

जूतेके नाम ३-पादुका १ पादू २ उपानत् ३ ॥

-संवानुपदीना पदायता ॥ ३० ॥

मोजेका नाम १-अनुपदीना १ ॥ ३० ॥

नध्री वध्री वरत्रा स्या—

चमड़ेकी रस्सीके नाम ३-नध्री १ वध्री २ वरत्रा ३ ॥

—दश्वादेस्ताडनी कशा।

कोड़का नाम १-कशा १ ॥

चाण्डालिका तु कण्डोलवीणा चण्डालवल्लकी ॥ ३१ ॥

किंगरीबाजेके नाम ३-चाण्डालिका १ कण्डोलवीणा २ चण्डालवल्लकी ३ ॥ ३१ ॥

नाराची स्यादेषणिका—

कांटा अर्थात् सोना आदि तोलनेकी तराजूके नाम २-नाराची १ एषणिका २ ॥

—शाणस्तु निकषः कषः।

कसोटीके नाम ३-शाण १ निकष २ कष ३ ॥

व्रश्चनः पत्रपरशु—

रेतीके नाम २-व्रश्चन १ पत्रपरशु २ ॥

—रीषिका तूलिका समे ॥ ३२ ॥

सलाईके नाम २-ईषिका १ तूलिका २ ॥३२॥

तैजसा वर्तनी मूषा-

सुवर्ण इत्यादि धातु गलानेकी धरियाके नाम ३--तैजसा १ वर्तनी २ मूषा ३ ॥

—भस्त्रा चर्मप्रसेविका।

फूँकनीके नाम २- भस्त्रा १ चर्मप्रसेविका २ ॥

आस्फोटनी वेधनिका—

बर्मेके नाम २- आस्फोटनी १ वेधनिका २ ॥

कृपाणी कर्तरी समे ॥ ३३ ॥

एक प्रकारकी कैंचीके नाम २–कृपाणी १ कर्तरी २ ॥ ३३ ॥

वृक्षादनी वृक्षभेदी–

बसूले आदिके नाम २—वृक्षादनी १ वृक्षभेदी२

—टंकः पाषाणदारणः ।

टांकी अर्थात् पत्थर फोड़नेके हथियारके नाम २–टंक १ पाषाणदारण २ ॥

क्रकचोऽस्त्री करपत्र–

आरेके नाम २—क्रकच १ करपत्र २ ॥

–मारा चर्मप्रभेदिका ॥ ३४ ॥

आरीके नाम २—आरा १ चर्मप्रभेदिका २ ॥

सूर्मी स्थूणाऽयःप्रतिमा–

लोहेकी मूर्तिके नाम ३–सूर्मी १ स्थूणा २ अयःप्रतिमा ३ ॥

–शिल्पं कर्म कलादिकम् ॥ ३४ ॥

कारीगरीका नाम १–शिल्प १ ॥३४॥

प्रतिमानं प्रतिबिम्बं प्रतिमा प्रतियातना प्रतिच्छाया । प्रतिकृतिरर्चा पुंसि प्रतिनिधि—

प्रतिमा अर्थात् तसबीरके नाम ८–प्रतिमान १ प्रतिबिम्ब २ प्रतिमा ३ प्रतियातना ४ प्रतिच्छाया ५ प्रतिकृति ६ अर्चा ७ प्रतिनिधि ८ ॥

–रुपमोपमानं स्यात् ॥ ३५ ॥

मिसाल और जिसकी मिसाल दी जाय उसके नाम २–उपमा १ उपमान २ ॥ ३५ ।

वाच्यलिंगाः समस्तुल्यः सदृक्षः सदृशः सदृक् ॥ ३६ ॥ साधारणः समानश्च–

बराबरके नाम ७—सम १ तुल्य २ सदृक्ष ३ सदृश ४ सदृग् ५ ॥ ३६ ॥ साधारण ६ समान ७

–स्युरुत्तरपदे त्वमी । निभसंकाशनीकाशप्रतीकाशोपमादयः ॥ ३७ ॥

समानके नाम ५–निभ १ संकाश २ नीकाश ३ प्रतीकाश ४ उपमा ५ ॥ ३७ ॥

कर्मण्या तु विधा भृत्या भृतयो भर्म वेतनम् । भरण्यं भरणं मूल्यं निर्वेशः पण इत्यपि ॥ ३८ ॥

मजूरीके नाम ११–कर्मण्या १ विधा २ भृत्या ३ भृति ४ भर्मन् ५ वेतन ६ भरण्य ७ भरण ८ मूल्य ९ निर्वेश १० पण ११ ॥ ३८ ॥

सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा । गन्धोत्तमा प्रसन्नेरा कादम्बर्यः परिस्रुता ॥ ३९ ॥ मदिरा कश्यमद्ये चा—

मदिरा अर्थात् शराबके नाम १३–सुरा १ हलिप्रिया २ हाला ३ परिस्रुत् ४ वरुणात्मजा ५ गन्धोत्तमा ६ प्रसन्ना ७ इरा ८ कादम्बरी ९ परिस्रुता १० ॥ ३९ ॥ मदिरा ११ कश्य १२ मद्य १३

–प्यवदंशस्तु भक्षणम् ।

मद्यपानकी रुचि उत्पन्न करनेके लिए भूंजा चना इत्यादि खानेका नाम १–अवदंश १ ॥

शुण्डापानं मदस्थानं—

मदिरा पीनेके स्थानके नाम २–शुण्डापान १ मदस्थान २ ॥

मधुवारा मधुक्रमाः ॥ ४० ॥

मदिरा पीनेके समयके नाम २–मधुवार १ मधुक्रम२ ॥ ४० ॥

मध्वासवो माधवको मधु माध्वीकमद्वयोः ।

महुवासे उत्पन्न मदिराके नाम ४–मध्वासव १ माधवक २ मधु ३ माध्वीक ४ ॥

मैरेयमासवः सीधु–

गुड़सीराकी मदिराके नाम ३–मैरेय १ आसव २ सीधु ३ ॥

–मेदको जगलः समौ ॥ ४१ ॥

मदिराके फोकसके नाम २—मेदक १ जगल २ ॥ ४१ ॥

संधानं स्यादभिषवः—

मदिरा करनेके नाम २–संधान १ अभिषव २॥

किण्वं पुंसि तु नग्नहूः ।

तंदुलादि द्रव्यसे बने हुए मद्यके नाम २-किण्व १ नग्नहू २ ॥

कारोत्तरः सुराभण्ड—

मदिराके मण्डके नाम २—कारोत्तर १ सुराभण्ड २ ॥

आपानं पानगोष्ठिका ॥ ४२ ॥

दारू पीनेकी सभाके नाम २-आपान १ पानगोष्ठिका २ ॥ ४२ ॥

चषकोऽस्त्री पानपात्रं—

दारू पीनेके बर्त्तन (प्याले) के नाम २-चषक १ पानपात्र २ ॥

-सरकोऽप्यनुतर्षणम् ।

मदिरा पीनेके नाम २-सरक १ अनुतर्षण २ ॥

धूर्तोऽक्षदेवी कितवोऽक्षधूर्तो द्यूतकृत्समाः ॥ ४३ ॥

जुआरीके नाम ५-धूर्त १ अक्षदेविन् २ कितव ३ अक्षधूर्त्त ४ द्यूतकृत् ५ ॥ ४३ ॥

स्युर्लग्नकाः प्रतिभुवः—

जामिनके नाम २-लग्नक १ प्रतिभू २ ॥

-सभिका द्यूतकारकाः ।

जुवा खिलानेवालेके नाम २—सभिक १ द्यूतकारक २ ॥

द्यूतोऽस्त्रियामक्षवती कैतवं पण इत्यपि ॥ ४४ ॥

जुएके नाम ४-द्यूत १ अक्षवती २ कैतव ३ पण ४ ॥ ४४ ॥

पणोऽक्षेषु ग्लहो—

बाजी लगानेके नाम २-पण १ ग्लह २ ॥

—ऽक्षास्तु देवनाः पाशकाश्च ते ।

पासेके नाम ३-अक्ष १ देवन २ पाशक ३ ॥

परिणायस्तु शारीणां समन्तान्नयनेऽस्त्रियाम् ॥ ४५ ॥

सारक इधर उधर फेरनेवालेका नाम १-परिणाय १ ॥ ४५ ॥

अष्टापदं शारिफलं-

बिसायती (चौपड़) के नाम २-अष्टापद १ शारिफल २ ॥

-प्राणिद्यूतं समाह्वयः ।

मुरगा आदि जीवोंकी लड़ाईरूप द्यूतके नाम २-प्राणिद्यूत १ समाह्वय २ ॥

उक्ता भूरिप्रयोगत्वादेकस्मिन्नेव यौगिकाः ॥ ४६ ॥ ताद्धर्म्यादन्यतो वृत्तावूह्या लिङ्गान्तरेऽपि ते ।

इस वर्गमें जो यौगिक मालाकार मार्दंगिक वैणविक आदि शब्द काव्यादिकोंके अधिक प्रयोग के अनुसार केवल पुंलिगमें ही कहे हैं वे शब्द व्याकरणके नियमानुसार स्त्रीलिंग नपुंसकलिंगमें भी होते हैं, जैसे मालाकारकी स्त्री मालाकारी और मालाकारका कुल मालाकार इसी प्रकार सर्वत्र जानना ।

इत्यमरसिंहकृतौ नामलिंगानुशासने । भूम्यादिकाण्डो द्वितीयः सांग एव समर्थितः ॥ ४७ ॥

इति श्रीमदमरसिंहविरचितामरकोशे ज्वालाप्रसादकृतभाषाटीकायां द्वितीयः काण्डः समाप्तः ॥ २ ॥

इति द्वितीयः काण्डः ॥ २ ॥

श्रीः ।

अथ तृतीयः काण्डः ।

अथ विशेष्यनिघ्नवर्गः १.

विशेष्यनिघ्नैः संकीर्णैर्नानार्थैरव्ययैरपि॥ लिंगादिसंग्रहैर्वर्गाः सामान्ये वर्गसंश्रयाः ॥ १ ॥

इस सामान्य तृतीयकाण्डमें स्वर्गादि वर्गोंके आश्रित शब्द विशेष्यनिघ्नवर्ग, संकीर्णवर्ग, नानार्थवर्ग, अव्ययवर्ग, और लिंगादिसंग्रहवर्गके द्वारा कहेंगे ॥ १ ॥

स्त्रीदाराद्यैर्यद्विशेष्यं यादृशैः प्रस्तुतं पदैः। गुणद्रव्याक्रियाशब्दास्तथा स्युस्तस्य भेदकाः ॥

स्त्री दार आदि विशेष्यभूत पदोंमें जो लिङ्ग और संख्या हो वही लिङ्ग और संख्या गुण और द्रव्य तथा क्रिया वाचकशब्दोंमें होनेसे दार स्त्री आदि शब्दोंके गुण द्रव्य क्रियावाचक शब्द विशेषण हो सकते हैं. जैसे-सुकृतिनी स्त्री, सुकृतिनो दाराः, सुकृति कलत्रम् । दण्डिनी स्त्री, दण्डिनो दाराः, दण्डि कलत्रम् । पाचिका स्त्री, पाचका दाराः, पाचकं कलत्रम् ॥ २ ॥

सुकृती पुण्यवान् धन्यो—

भाग्यवान् पुरुषके नाम ३-सुकृतिन् १ पुण्यवत् २ धन्य ३ ॥

-महच्छस्तु महाशयः ।

उदारचित्त पुरुषके नाम २-महेच्छ १ महाशय २ ॥

हृदयालुः सुहृदयो-

शुद्धचित्त पुरुषके नाम २-हृदयालु १ सुहृदय२

-महोत्साहो महोद्यमः ॥ ३ ॥

बहुत उद्यम करनेवाले पुरुषके नाम २-महोत्साह १ महोद्यम २ ॥ ३ ॥

प्रवीणे निपुणाभिज्ञविज्ञनिष्णातशिक्षिताः । वैज्ञानिकः कृतमुखः कृती कुशल इत्यपि ॥ ४ ॥

चतुर पुरुषके नाम १०-प्रवीण १ निपुण २ अभिज्ञ ३ विज्ञ ४ निष्णात ५ शिक्षित ६ वैज्ञानिक ७ कृतमुख ८ कृतिन् ९ कुशल १० ॥ ४ ॥

पूज्यः प्रतीक्ष्यः—

मान्य पुरुषके नाम २-पूज्य १ प्रतीक्ष्य ॥ २ ॥

सांशयिकः संशयापन्नमानसः ।

संशय करानेवाली वस्तुके नाम २—सांशयिक १ संशयापन्नमानस २ ॥

दक्षिणीयो दक्षिणार्हस्तत्र दक्षिण्य इत्यपि ॥ ५ ॥

दक्षिणाके योग्य पुरुषके नाम ३-दक्षिणीय १ दक्षिणार्ह २ दक्षिण्य ३ ॥ ५ ॥

स्युर्वदान्यस्थूललक्ष्यदानशौण्डा बहुप्रदे

अतिदानी पुरुषके नाम ४-वदान्य १ स्थूललक्ष्य २ दानशौण्ड ३ बहुप्रद ४ ॥

जैवातृकः स्यादायुष्मा-

दीर्घायु पुरुषके नाम २-जैवातृक १ आयुष्मत् २

नन्तर्वाणिस्तु शास्त्रवित ॥ ६ ॥

शास्त्रीके नाम २—अन्तर्वाणि १ शास्त्रविद् २ ॥ ६ ॥

परीक्षकः कारणिको—

परीक्षकके नाम २-परीक्षक १ कारणिक२ ॥

-वरदस्तु समर्धकः ।

वरदान देनेवालेके नाम २-वरद १ समर्धक २।

हर्षमाणो विकुर्वाणः प्रमना हृष्टमानसः ॥ ७ ॥

प्रसन्नके नाम ४-हर्षमाण १ विकुर्वाण २ प्रमनस् ३ हृष्टमानस ४ ॥ ७ ॥

दुर्मना विमना अन्तर्मनाः-

उदास पुरुषके नाम ३-दुर्मनस् १ विमनस् २ अन्तर्मनस् ३ ॥

-स्यादुत्क उन्मनाः ।

उत्कण्ठायुक्त पुरुषके नाम २—उत्क १ उन्मनस् २ ॥

दक्षिणे सरलोदारौ—

सीधे पुरुषके नाम ३—दक्षिण १ सरल २ उदार ३ ॥

—सुकनो दातृभोक्तरि ॥ ८ ॥

दानी और भोगी पुरुषका नाम १—सुकन १ ॥ ८ ॥

तत्परे प्रसितासक्ता-

कार्य्यविशेषमें चित्त लगानेवाले पुरुषके नाम ३—तत्पर १ प्रसित २ आसक्त ३ ॥

-विष्टार्थोद्युक्त उत्सुकः ।

अभीष्ट वस्तुके प्राप्त करनेमें तत्पर पुरुषके नाम ३-इष्टार्थोद्युक्त १ उत्सुक २ ॥

प्रतीते प्रथितख्यातवित्तविज्ञातविश्रुताः ॥ ९ ॥

प्रसिद्ध पुरुषके नाम ६-प्रतीत १ प्रथित २ ख्यात ३ वित्त ४ विज्ञात ५ विश्रुत ६ ॥ ९ ॥

गुणैः प्रतीते तु कृतलक्षणाहितलक्षणौ ।

गुणोंसे प्रसिद्ध पुरुषके नाम २-कृतलक्षण १ आहितलक्षण २ ॥

इभ्य आढ्यो धनी-

धनी पुरुषके नाम ३-इभ्य १ आढ्य २ धनिन् ३

—स्वामी त्वीश्वरः पतिरीशिता ॥१०॥
अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।

स्वामीके नाम १०-स्वामिन् १ ईश्वर २ पति ३ ईशितृ ४ ॥ १० ॥ अधिभू ५ नायक ६ नेतृ ७ प्रभु ८ परिवृढ ९ अधिप १० ॥

आधिकर्द्धिः समृद्धः स्यात—

सम्पत्तिमान् पुरुषके नाम २—आधिकर्धि १ समृद्ध २ ॥

-कुटुम्बव्यापृतस्तु यः ॥ ११ ॥
स्यादभ्यागारिकस्तस्मिन्नुपाधिश्च पुमानयम् ।

कुटुम्बके पालन करनेमें तत्पर पुरुषके नाम ३-कुटुम्बव्यापृत १ ॥ ११ ॥ अभ्यागारिक २ उपाधि ३ ॥

वारांगरूपोपेतो यः सिंहसंहननो हि सः ॥ १२ ॥

अङ्ग और रूपसे अतिश्रेष्ठ पुरुषका नाम १—सिंहसंहनन १ ॥ १२ ॥

निर्वार्यः कार्यकर्ता यः सम्पन्नः सत्त्वसम्पदा ।

जो दुःखमें भी प्रसन्नताके साथ कार्य किया करता है उस पुरुषका नाम १-निर्वार्य १ ॥

अवाचि मूको-

गूँगे पुरुषके नाम २-अवाच् १ मूक २ ॥

-ऽथ मनोजवसः पितृसन्निभः ॥ १३ ॥

जो पुरुष पिताके समान माना जाय उस पुरुषके नाम २-मनोजवस् १ पितृसन्निभ२ ॥१३॥

सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः ।

जो वरको आदरपूर्वक वस्त्र भूषण सहित कन्यादान दे उस पुरुषका नाम १-कूकुद १ ॥

लक्ष्मीवांल्लक्ष्मणः शीलः श्रीमान्-

शोभावान्के नाम ४–लक्ष्मीवत् १ लक्ष्मण २ श्रील ३ श्रीमत् ४ ॥

स्निग्धस्तु वत्सलः ॥ १४ ॥

स्नेही पुरुषके नाम २–स्निग्ध १ वत्सल २ ॥ १४ ॥

स्याद्दयालुः कारुणिकः कृपालुः सूरतः समाः ।

दयावान् पुरुषके नाम ४–दयालु १ कारुणिक २ कृपालु ३ सूरत ॥ ४ ॥

स्वतन्त्रोऽपावृतः स्वैरी स्वच्छन्दो निरवग्रहः ॥ १५ ॥

स्वतन्त्र पुरुषके नाम ५–स्वतन्त्र १ अपावृत २ स्वैरिन् ३ स्वच्छन्द ४ निरवग्रह ५ ॥ १५ ॥

परतन्त्रः पराधीनः परवान्नाथवानपि ।

पराधीन पुरुषके नाम ४–परतन्त्र १ पराधीन २ परवत् ३ नाथवत् ४ ॥

अधीनो निघ्न आयत्तोऽस्वच्छन्दो गृह्यकोऽप्यसौ ॥ १६ ॥

अधीनके नाम ५–अधीन १ निघ्न २ आयत्त ३ अस्वच्छन्द ४ गृह्यक ५ ॥ १६ ॥

खलपूः स्याद्बहुकरो–

बुहारने झारनेवाले मनुष्यके नाम २–खलपू १ बहुकर २ ॥

दीर्घसूत्रश्चिरक्रियः ।

दीर्घसूत्र (थोड़ी देरके कामको बहुत देरमें करनेवालों) के नाम २–दीर्घसूत्र १ चिरक्रिय २॥

जाल्मोऽसमीक्ष्यकारी स्यात—

विना विचारे कार्य करनेवाले पुरुषके नाम २–जाल्म १ असमीक्ष्यकारिन् २ ॥

—कुण्ठो मन्दः क्रियासु यः ॥ १७ ॥

आलसी वा मूढ़ पुरुषका नाम १–कुण्ठ १ १७।

कर्मक्षमोऽलंकर्मीणः—

कार्य्य करनेमें समर्थ पुरुषके नाम २–कर्मक्षम १ अलंकर्मीण २ ॥

क्रियावान्कर्मसूद्यतः ।

कार्य करनेमें तत्पर पुरुषका नाम १–क्रियावत् १

स कार्मः कर्मशीलो यः—

जो नित्य काममें लगा रहे उस पुरुषके नाम २–कार्म १ कर्मशील २ ॥

कर्मशूरस्तु कर्मठः ॥ १८ ॥

प्रयत्नपूर्वक जो कार्यको समाप्त करे उस पुरुषके नाम २–कर्मशूर १ कर्मठ २ ॥ १८ ॥

—भरण्यभुक्कर्यकरः–

मजदूरके नाम २–भरण्यभुज् १ कर्मकर २ ॥

–कर्मकारस्तु तत्क्रियः ।

विना मजूरीके भी जो कार्य कर दे उस पुरुषका नाम १–कर्मकार १ ॥

अपस्नातो मृतस्नात–

किसीके मरनेके अनन्तर स्नान किये हुए पुरुषके नाम २–अपस्नात १ मृतस्नात २ ॥

आमिषाशी तु शौष्कुलः ॥ १९ ॥

मांस खानेवाले पुरुषके नाम २–आमिषाशिन् १ शौष्कुल २ ॥ १९ ॥

बुभुक्षितः स्यात्क्षुधितो जिघत्सुरशनायितः ।

भूखे पुरुषके नाम ४–बुभुक्षित १ क्षुधित २ जिघत्सु ३ अशनायित ४ ॥

परान्नः परपिण्डादो—

जो पराये ही अन्नसे जीता हो उस पुरुषके नाम २–परान्न १ परपिण्डाद २ ॥

–भक्षको घस्मरोऽग्रः ॥ २० ॥

खानेवालेके नाम ३–भक्षक १ घस्मर २ अग्र ३ ॥ २० ॥

आद्यूनः स्यादौदरिको विजिगीषाविवर्जिते ॥

अत्यन्त ही भूखे पुरुषके नाम २–आद्यून १ औदरिक २ ॥

उभौ त्वात्मंभरिः कुक्षिंभरिः स्वोदरपूरके ॥ २१ ॥

पेटको ही भरनेवाले पुरुषके नाम २–आत्मम्भरि १ कुक्षिम्भरि २ ॥ २१ ॥

सर्वान्नीनस्तु सर्वान्नभोजी–

जो सब वर्णोंका अन्न भोजन कर लेता हो उस पुरुषके नाम २–सर्वान्नीन १ सर्वान्नभोजिन् २ ॥

–गृध्नस्तु गर्धनः । लुब्धोऽभिलाषुकस्तृष्णकृ–

लोभी पुरुषके नाम ५–गृध्न १ गर्धन २ लुब्ध ३ अभिलाषुक ४ तृष्णज् ५ ॥

–समौलोलुपलोलुभौ ॥ २२ ॥

अतिलोभीके नाम २–लोलुप १ लोलुभ २ २२।

सोन्मादस्तून्मदिष्णुः स्या—

उन्मत्तपुरुषके नाम २–सोन्माद १ उन्मदिष्णु२।

–दविनीतः समुद्धतः ।

अन्यायी पुरुषके नाम २–अविनीत १ समुद्धत २ ॥

मत्ते शौण्डोत्कटक्षीबाः

मतवालेके नाम ४–मत्त १ शौण्ड २ उत्कट ३ क्षीब ४ ॥

–कामुके कमिलाऽनुकः ॥ २३ ॥ कम्रः कामयिताभीकः कमनः कामनोऽभिकः ।

कामीके नाम ९—कामुक १ कमितृ २ अनुक ३ ॥ २३ ॥ कम्र ५ कामयितृ ५ अभीक ६ कमन ७ कामन ८ अभिक ९ ॥

विधेयो विनयग्राही वचनेस्थित आश्रवः ॥ २४ ॥

वचन ग्रहण करनेवाले पुरुषके नाम ४–विधेय १ विनयग्राहिन् २ वचनेस्थित ३ आश्रव ४ ।२४।

वश्यः प्रणेयो—

वशीभूतके नाम २–वश्य १ प्रणेय २ ॥

—निभृतविनीतप्रश्रिताः समाः ।

नम्र पुरुषके नाम ३–निभृत १ विनीत २ प्रश्रित ३ ॥

धृष्टे धृष्णाग्वियातश्च–

धीठ पुरुषके नाम ३–धृष्ट १ धृष्णज् २ वियात ३ ॥

प्रगल्भः प्रतिभान्विते ॥ २५ ॥

अति धीठ निर्भर पुरुषके नाम २–प्रगल्भ १ प्रतिभान्वित २ ॥ २५ ॥

स्यादधृष्टे तु शालीनो—

लज्जावान् पुरुषके नाम २–अधृष्ट १ शालीन २।

विलक्षो विस्मयान्विते ।

अचम्भेमें पड़े हुए पुरुषके नाम २–विलक्ष १ विस्मयान्वित २ ॥

अधीरे कातर—

व्याकुल हुए पुरुषके नाम २–अधीर १ कातर २

त्रस्ते भीरुभीरुकभीलुकाः ॥२६॥

डरपोकके नाम ४—त्रस्त १ भीरु २ भीरुक ३ भीलुक ४ ॥ २६ ॥

आशंसुराशंसितरि–

इष्ट अर्थप्राप्तिकी इच्छावाले पुरुषके नाम २–आशंसु १ आशंसितृ २ ॥

–गृह्यालुर्ग्रहीतरि ।

लेनेके स्वभाववाले पुरुषके नाम २– गृह्यालु १ ग्रहीतृ २ ॥

श्रद्धालुः श्रद्धया युक्त—

श्रद्धायुक्त स्वभाववाले पुरुषका नाम१–श्रद्धालु१

—पतयालुस्तु पातुके ॥ २७ ॥

गिरनेके स्वभाववाले पुरुषके नाम २–पतयालु १ पातुक २ ॥ २७ ॥

लज्जाशीलेऽपत्रपिष्णु—

लज्जाशील पुरुषके नाम २–लज्जाशील १ अपत्रपिष्णु २ ॥

—वन्दारुरभिवादके ।

वन्दना करनेके स्वभाववाले पुरुषके नाम २—वन्दारु १ अभिवादक २ ॥

शरारुर्घातुको हिंस्रः—

हिंसा करनेके स्वभाववाले पुरुषके नाम ३—शरारु १ घातुक २ हिंस्र ३ ॥

—स्याद्वर्द्धिष्णुस्तु वर्धनः ॥ २८ ॥

बढ़नेके स्वभाववाले पुरुषके नाम २ वर्द्धिष्णु १ वर्धन २ ॥ २८ ॥

उत्पतिष्णुस्तूत्पतिता—

कूदनेके स्वभाववालेके नाम २—उत्पतिष्णु १ उत्पतितृ २ ॥

—ऽलंकरिष्णुस्तु मण्डनः ।

भूषण आदि पहरनेके स्वभाववालेके नाम २—अलंकरिष्णु १ मंडन २ ॥

भूष्णुर्भविष्णुर्भविता—

होनेके स्वभाववालेके नाम ३—भूष्णु १ भविष्णु २ भवितृ ३ ॥

वर्तिष्णुर्वर्तनः समौ ॥ २९ ॥

वर्त्ताव करनेके स्वभाववालेके नाम २—वर्तिष्णु १ वर्त्तन २ ॥ २९ ॥

निराकरिष्णुः क्षिप्नुः स्यात्—

तिरस्कार करनेके स्वभाववालेके नाम २—निराकरिष्णु १ क्षिप्नु २ ॥

—सान्द्रस्निग्धस्तु मेदुरः ।

सघन और चिकनेका नाम १—मेदुर १ ॥

ज्ञाता तु विदुरो विन्दु ...

जाननेके स्वभाववालेके नाम ३—ज्ञातृ १ विदुर २ विन्दु ३ ॥

विकासी तु विकस्वरः ॥ ३० ॥

खिलनेके स्वभाववालेके नाम २—विकासिन् १ विकस्वर २ ॥ ३० ॥

विसृत्वरो विसृमरः प्रसारी च विसारिणि ।

फलनेके स्वभाववालेके नाम ४—विसृत्वर १ विसृमर २ प्रसारिन् ३ विसारिन् ४ ॥

सहिष्णुः सहनः क्षन्ता तितिक्षुः क्षमिता क्षमी ॥ ३१ ॥

सहनशीलवालेके नाम ६—सहिष्णु १ सहन २ क्षन्तृ ३ तितिक्षु ४ क्षमितृ ५ क्षमिन् ६ ॥ ३१ ॥

क्रोधनोऽमर्षणः कोपी—

क्रोधके स्वभाववालेके नाम ३—क्रोधन १ अमर्षण २ कोपिन् ३ ॥

—चण्डस्त्वत्यन्तकोपनः ।

अत्यन्त क्रोधके स्वभाववालेके नाम २—चण्ड १ अत्यन्तकोपन २ ॥

जागरूको जागरिता—

जागनेके स्वभाववालेके नाम २—जागरूक १ जागरितृ २ ॥

घूर्णितः प्रचलायितः ॥ ३२ ॥

घूरनेवालेके नाम २—घूर्णित १ प्रचलायित २ ॥ ३२ ॥

स्वप्नक्छयालुर्निद्रालु—

निद्रालुके नाम ३—स्वप्नक् १ शयालु २ निद्रालु ३ ॥

निद्राणशयितौ समौ ।

शयन करनेवालेके नाम २—निद्राण १ शयित २ ॥

पराङ्मुखः पराचीनः—

विमुखके नाम २—पराङ्मुख १ पराचीन २ ॥

—स्यादवाङ्प्यधोमुखः ॥ ३३ ॥

नीचेको मुख करनेवालेके नाम २—अवाच् १ अधोमुख २ ॥ ३३ ॥

देवानञ्चति देवद्र्यङ्—

देवताओंकी पूजा करनेवालेका नाम १—देवद्र्यच् १ ॥

-विष्वग्यङ् विष्वगञ्चति ।

सब ओर जानेवालेका नाम १--विष्वग्यच् १ ॥

यः सहाञ्चति सध्र्यङ् सः—

साथ रहनेवालेका नाम १-- सध्र्यच् १ ॥

—स तिर्यङ् यस्तिरोऽञ्चति ॥ ३४ ॥

टेढे चलनेवालेका नाम १--तिर्यच् १ ॥ ३४ ॥

वदो वदावदो वक्ता—

वक्ताके नाम ३--वद १ ददावद २ वक्तृ ३ ॥

-वागीशो वाक्पतिः समौ ।

चातुर्ययुक्त बोलनेवालेके नाम २--वागीश १ वाक्पति २ ॥

वाचोयुक्तिपटुर्वाग्मी वावदूकोऽतिवक्तरि ॥ ३५ ॥

शास्त्रानुसार अत्यन्त बोलनेवालेके नाम ४--वाचोयुक्तिपटु १ वाग्मिन् २ वावदूक ३ अतिवक्तृ ४ ॥ ३५ ॥

स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक् ।

अतिनिन्दित भाषण करनेवालेके नाम ४--जल्पाक १ वाचाल २ वाचाट ३ बहुगर्ह्यवाच् ४ ॥

दुर्मुखे मुखराबद्धमुखौ—

अप्रिय बोलनेवालेके नाम ३-दुर्मुख १ मुखर २ अबद्धमुख ३ ॥

शक्लः प्रियंवदे ॥ ३६ ॥

प्रिय बोलनेवालेके नाम २—शक्ल १ प्रियंवद ॥२ ॥ ३६

लोहलः स्यादस्फुटवा—

जो स्फुट न बोलता हो उस पुरुषके नाम २-लोहल १ अस्फुटवाच् २ ॥

गर्ह्यवादी तु कद्वदः ।

निन्दित वाक्य बोलनेवाले पुरुषके नाम २-गर्ह्यवादिन् १ कद्वद २ ॥

समौ कुवादकुचरौ—

बुराई कहनेवालेके नाम २-कुवाद १ कुचर २

-स्यादसौम्यस्वरोऽस्वरः ॥ ३७ ॥

रूखे स्वरवालेके नाम २-असौम्यस्वर १ अस्वर २ ॥ ३७ ॥

रवणः शब्दनो—

चिल्लानेवालेके नाम २-रवण १ शब्दन २ ॥

-नान्दीवादी नान्दीकरः समौ ।

नान्दीवादी अर्थात् नाटकके आरम्भमें स्तुतिविशेष करनेवालेके नाम २-नान्दीवादिन् १ नान्दीकर २ ॥

जडोऽज्ञ—

महामूर्खके नाम २-जड १ अज्ञ २ ॥

एडमूकस्तु वक्तुं श्रोतुमशिक्षिते ॥ ३८॥

जो गूंगा बहिरा दोनों हो उसका नाम १-एडमूक १ ॥ ३८ ॥

तूष्णींशीलस्तु तूष्णीको—

मौन रहनेवाले पुरुषके नाम २-तूष्णींशील १ तूष्णीक २ ॥

नग्नोऽवासा दिगम्बरे ।

नग्न पुरुषके नाम ३—नग्न १ अवासस् २ दिगम्बर ३ ॥

निष्कासितोऽवकृष्टः स्या-

निकाले हुएके नाम २—निष्कासित १ अवकृष्ट २ ॥

-दपध्वस्तस्तुधिक्कृतः ॥ ३९ ॥

धिक्कार दिये हुए पुरुषके नाम २-अपध्वस्त १ धिक्कृत २ ॥ ३९ ॥

आत्तगर्वोऽभिभूतः स्या-

तिरस्कारको प्राप्त हुए पुरुषके नाम २-आत्तगर्व १ अभिभूत २ ॥

-द्रापितः साधितः समौ ।

धनादि दिलाकर वशमें किये हुए पुरुषके नाम

२-दापित १ साधित २ ॥

प्रत्यादिष्टो निरस्तः स्यात्प्रत्याख्यातो निराकृतः ॥ ४० ॥

निरादरको प्राप्त हुए पुरुषके नाम ४-प्रत्यादिष्ट १ निरस्त २ प्रत्याख्यात ३ निराकृत ४ ॥ ४० ॥

निकृतः स्याद्विप्रकृतो—

बुरे रूपवालेके नाम २-निकृत १ विप्रकृत २ ॥

-विप्रलब्धस्तु वञ्चितः।

ठगे हुए पुरुषके नाम २-विप्रलब्ध १ वञ्चित २ ॥

मनोहतः प्रतिहतः प्रतिबद्धो हतश्च सः ॥ ४१ ॥

मनोहत पुरुषके नाम ४-मनोहत १ प्रतिहत २ प्रतिबद्ध ३ हत ४ ॥ ४१ ॥

अधिक्षिप्तः प्रतिक्षिप्तो-

जिसके ऊपर आक्षेप किया गया हो उस पुरुष के नाम २-अधिक्षिप्त १ प्रतिक्षिप्त २ ॥

—बद्धे कीलितसंयतौ।

बांधे हुएके नाम ३-बद्ध १ कीलित २ संयत ३

आपन्न आपत्प्राप्तः स्यात्—

आपत्तिको प्राप्त हुए पुरुषके नाम २-आपन्न १ आपत्प्राप्त २ ॥

कांदिशीको भयद्रुतः ॥ ४२ ॥

भयसे भागे हुएके नाम २-कांदिशीक १ भयद्रुत २ ॥ ४२ ॥

आक्षारितः क्षारितोऽभिशस्ते-

मैथुनके निमित्त वृथा दोष लगाये हुए पुरुषके नाम ३-आक्षारित १ क्षारित २ अभिशस्त ३ ॥

-संकसुकोऽस्थिरे।

चंचल स्वभाववाले पुरुषके नाम २-संकसुक २ अस्थिर २ ॥

व्यसनार्तोपरक्तौ द्वौ—

दैवी और मानुषी पीड़ासे युक्त पुरुषके नाम २-व्यसनार्त्त १ उपरक्त २ ॥

विहस्तव्याकुलौ समौ ॥ ४२ ॥

शोकादिसे व्याकुल पुरुषके नाम २-विहस्त १ व्याकुल २ ॥ ४३ ॥

विक्लवो विह्वलः-

विकल पुरुषके नाम २-विक्लव १ विह्वल २ ॥

त्यात्तु विवशोऽरिष्टदुष्टधीः।

मरणके समीप आनेसे जिसकी बुद्धि विपरीत हो जाय उस पुरुषके नाम २-विवश १ अरिष्टदुष्टधी २ ॥

कश्यः कशार्हे-

बेत मारने योग्यके नाम २-कश्य १ कशार्ह २॥

-सन्नद्ध त्वाततायी वधोद्यते ॥ ४४ ॥

मारनेको उद्यतका नाम १-आततायिन् १ ४४

द्वेष्ये त्वक्षिगतो-

द्वेष करने लायकके नाम २—द्वेष्य १ अक्षिगत २ ॥

-वध्यः शीर्षच्छेद्य इमौ समौ ॥

शिर काटने योग्यके नाम २-वध्य १ शीर्षच्छेद्य २ ॥

विष्यो विषेण यो वध्यो—

विषकरके मारने योग्यका नाम १—विष्य १॥

मुसल्यो मुसलेन यः ॥ ४५ ॥

मुसलसे मारने योग्यका नाम १—मुसल्य १ ॥ ४५ ॥

शिश्विदानोऽकृष्णकर्मा —

पापकर्म न करनेवाले पुरुषके नाम २-शिश्विदान १ अकृष्णकर्मन् २ ॥

चपलश्चिकुरः समौ।

बिना दोष विचारे मारनेवालेके नाम २—चपल १ चिकुर २ ॥

दोषैकदृक्पुरोभागी-

केवल दोषकी ही दृष्टि करनेवालेके नाम २—दोषैकदृक् १ पुरोभागिन् २ ॥

निकृतस्त्वनृजुः शठः ॥ ४६ ॥

कुटिलहृदयके नाम २—निकृत १ अनृजु २ शठ ३ ॥ ४६ ॥

कर्णेजपः सूचकः स्यात्-

चुगलखोरके नाम २-कर्णेजप १ सूचक २ ॥

-पिशुनो दुर्जनः खलः ।

आपसमें भेद करानेवालेके नाम ३-पिशुन १ दुर्जन २ खल ३ ॥

नृशंसो घातुकः क्रूरः पापो-

घातक अथवा कठोर पुरुषके नाम ४-नृशंस १ घातुक २ क्रूर ३ पाप ४ ॥

—धूर्तस्तु वञ्चकः ॥ ४७ ॥

ठगके नाम २-धूर्त १ वञ्चक २ ॥ ४७ ॥

अज्ञे मूढयथाजातमूर्खवैधेयबालिशाः ।

मूर्खके नाम ६-अज्ञ १ मूढ २ यथाजात ३ मूर्ख ४ वैधेय ५ बालिश ६ ॥

कदर्ये कृपणक्षुद्रकिंपचानमितंपचाः ४८

कृपणके नाम ५-कदर्य १ कृपण २ क्षुद्र ३ किंपचान ४ मितम्पच ५ ॥ ४८ ॥

निःस्वस्तु दुर्विधो दीनो दरिद्रो दुर्गतोऽपि सः ।

दरिद्र पुरुषके नाम ५-निःस्व १ दुर्विध २ दीन ३ दरिद्र ४ दुर्गत ५ ॥

वनीयको याचनको मार्गणो याचकार्थिनौ ॥ ४९ ॥

मांगनेवालेके नाम ५-वनीयक १ याचनक २ मार्गण ३ याचक ४ अर्थिन् ५ ॥ ४९ ॥

अहंकारवानहंयुः—

अहंकारयुक्त पुरुषके नाम २-अहंकारवन् १ अहंयु २ ॥

-शुभंयुस्तु शुभान्वितः ।

शुभयुक्त पुरुषके नाम २-शुभंयु १ शुभान्वित २

दिव्योपपादुका देवा-

देवताओंका नाम १-दिव्योपपादुक १ ॥

-नृगवाद्या जरायुजाः ॥ ५० ॥

मनुष्य, गौ आदि 'जरायुज' कहलाते हैं ॥ ५०

स्वेदजाः कृमिदंशाद्या—

कीडा और डांस आदि 'स्वेदज' कहलाते हैं ॥

—पक्षिसर्पादयोऽण्डजाः ।

पक्षी, सर्पादि 'अण्डज' कहलाते हैं ॥

(इति प्राणिवर्गः)

उद्भिदस्तरुगुल्माद्या-

वृक्ष, वेल, घास आदि 'उद्भिद्' कहलाते हैं ॥

उद्भिद्बुद्भिज्जमुद्भिदम् ॥ ५१ ॥

उद्भिद्के नाम ३-उद्भिद् १ उद्भिज्ज २ उद्भिद ३ ॥ ५१ ॥

सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् । कांतं मनोरमं रुच्यं मनोज्ञं मञ्जु मञ्जुलम् ॥ ५२ ॥

सुन्दरके नाम १२—सुन्दर १ रुचिर २ चारु ३ सुषम ४ साधु ५ शोभन ६ कान्त ७ मनोरम ८ रुच्य ९ मनोज्ञ १० मञ्जु ११ मंजुल १२ ॥५२॥

तदासेचनकं तृप्तेर्नास्त्यन्तो यस्य दर्शनात् ।

जिसके देखनेसे तृप्तिके अन्तको प्राप्त न हो उसका नाम १-आसेचनक १ ॥

अभीष्टेऽभीप्सितं हृद्यं दयितं वल्लभं प्रियम् ॥ ५३ ॥

प्रियके नाम ६—अभीष्ट १ अभीप्सित २ हृद्य ३ दयित ४ वल्लभ ५ प्रिय ६ ॥ ५३ ॥

निकृष्टप्रतिकृष्टार्वरेफयाप्यावमाधमाः । कुपूयकुत्सितावद्यखेटगर्ह्याणकाः समाः ॥ ५४ ॥

अधमके नाम १३-निकृष्ट १ प्रतिकृष्ट २ अर्वन् ३ रेफ ४ याप्य ५ अवम ६ अधम ७ कुपूय ८ कुत्सित ९ अवद्य १० खेट ११ गर्ह्य १२ अणक १३ ॥ ५४ ॥

मलीमसं तु मलिनं कच्चरं मलदूषितम्

मलिनके नाम ४—मलीमस १ मलिन २ कच्चर ३ मलदूषित ४ ॥

पूत पवित्रं मेध्यं च–

पवित्रके नाम ३—पूत १ पवित्र २ मेध्य ३ ॥

—वीध्रं तु विमलार्थकम् ॥ ५५ ॥

स्वभावसे निर्मलके नाम २–वीध्र १ विमलार्थक २ ॥ ५५ ॥

निर्णिक्तं शोधितं मृष्टं निःशोध्यमनवकरम् ।

शुद्ध किये हुएके नाम ५–निर्णिक्त १ शोधित २ मृष्ट ३ निःशोध्य ४ अनवस्कर ५ ॥

–असारं फल्गु–

असार वस्तुके नाम २– असार १ फल्गु २ ॥

–शून्यं तु वशिकं तुच्छरिक्तके ॥ ५६ ॥

शून्यके नाम ४–शून्य १ वशिक २ तुच्छ ३ रिक्तक ४ ॥ ५६ ॥

क्लीबे प्रधानं प्रमुखप्रवेकानुत्तमोत्तमाः। मुख्यवर्यवरेण्याश्च प्रवर्होऽनवरार्ध्यवत् ॥ ५७ ॥ परार्ध्याग्रप्राग्रहरप्राग्र्याग्र्याग्रीयमग्रियम् ।

प्रधानके नाम १७—प्रधान १ प्रमुख २ प्रवेक ३ अनुत्तम ४ उत्तम ५ मुख्य ६ वर्य्य ७ वरेण्य ८ प्रवर्ह ९ अनवरार्ध्य १० ॥ ५७ ॥ परार्ध्य ११ अग्र १२ प्राग्रहर १३ प्राग्र्य १४ अग्र्य १५ अग्रीय १६ अग्रिय १७ ॥ ५७ ॥

श्रेयान् श्रेष्ठः पुष्कलः स्यात्सत्तमश्चातिशोभने ॥ ५८ ॥

अति सुन्दरके नाम ५–श्रेयस् १ श्रेष्ठ २ पुष्कल ३ सत्तम ४ अतिशोभन ५ ॥ ५८ ॥

व्युत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः। सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥ ५९ ॥

व्याघ्र, पुंगव, ऋषभ, कुञ्जर, सिंह, शार्दूल, नागादि शब्दोंके उत्तर आनेसे श्रेष्ठ अर्थके वाचक होते हैं जैसे पुरुष व्याघ्र, द्विजपुङ्गव इत्यादि ॥५९॥

अप्राग्र्यं द्वयहीने द्वे अप्रधानोपसर्जने ।

अप्रधानके नाम ३–अप्राग्र्य१ अप्रधान २ उपसर्जन ३ ॥

विशङ्कटं पृथु बृहद्विशालं पृथुलं महत् ॥ ६० ॥ वड्रोरुविपुलं—

चौड़ेके नाम ९–विशङ्कट १ पृथु २ बृहत् ३ विशाल ४ पृथुल ५ महत् ६ ॥ ६० ॥ वड्र ७ उरु ८ विपुल ९ ॥

–पीनपीवनी तु स्थूलपीवरे ।

मोटेके नाम ४–पीन १ पीवन् २ स्थूल ३ पीवर ४ ॥

स्तोकाल्पक्षुल्लकाः सूक्ष्मं श्लक्ष्णं दभ्रं कृश-तनु ॥ ६१ ॥ स्त्रियां मात्रा त्रुटिः पुंसि लवलेशकणाणवः ।

थोड़ेके नाम १४–स्तोक १ अल्प २ क्षुल्लक ३ सूक्ष्म ४ श्लक्ष्ण ५ दभ्र ६ कृश ७ तनु ८ ॥६१॥ मात्रा ९ त्रुटि १० लव ११ लेश १२ कण १३ अणु १४ ॥

अत्यल्पेऽल्पिष्ठमल्पीयः कनीयोऽणीय इत्यपि ॥ ६२ ॥

अति अल्पके नाम ४–अल्पिष्ठ १ अल्पीयस् २ कनीयस् ३ अणीयस् ४ ॥ ६२ ॥

प्रभूत प्रचुर प्राज्यमदभ्रं बहुलं बहु। पुरुहूः पुरु भूयिष्ठं स्फारं भूयश्च भूरि च ॥ ६३ ॥

बहुतके नाम १२—प्रभूत १ प्रचुर २ प्राज्य ३ अदभ्र ४ बहुल ५ बहु ६ पुरुहू ७ पुरु ८ भूयिष्ठ ९ स्फार १० भूयस् ११ भूरि १२ ॥ ६३ ॥

परःशताद्यास्ते येषां परा संख्याशतादिकात् ।

जिनकी संख्या शतसे अर्थात् सहस्रादिसे अधिक हो वह परःशत आदि कहलाते हैं ।

गणनीये तु गणेयं–

गिननेयोग्य वस्तुके नाम २-गणनीय १ गणेय २ ॥

—संख्याते गणित—

गिने हुएके नाम २-संख्यात १ गणित २ ॥

—मथ समं सर्वम् ॥ ६४ ॥ विश्वमशेषं कृत्स्नं समस्तनिखिलाखिलानि निःशेषम् । समग्रं सकलं पूर्णमखण्डं स्यादनूनके ६५॥

सम्पूर्णके नाम १४-सम १ सर्व २ ॥ ६४ ॥ विश्व ३ अशेष ४ कृत्स्न ५ समस्त ६ निखिल ७ अखिल ८ निःशेष ९ समग्र १० सकल ११ पूर्ण १२ अखण्ड १३ अनूनक १४ ॥ ६५ ॥

घनं निरन्तरं सान्द्रं—

घनेके नाम ३-घन १ निरन्तर २ सान्द्र ३ ॥

पेलवं विरलं तनु ।

छितरे (छीदे) के नाम ३-पेलव १ विरल २ तनु ३ ॥

समीपं निकटासन्नसन्निकृष्टसनीडवत् ॥ ६६ ॥ सदेशाभ्याशसविधसमर्यादसवेशवत् । उपकण्ठान्तिकाभ्यर्णाभ्यग्राभ्यभितोऽव्ययम् ॥ ६७ ॥

समीपके नाम १५-समीप १ निकट २ आसन्न ३ सन्निकृष्ट ४ सनीड ५ ॥ ६६ ॥ सदेश ६ अभ्याश ७ सविध ८ समर्याद ९ सवेश १० उपकण्ठ ११ अन्तिक १२ अभ्यर्ण १३ अभ्यग्र १४ अभितः १५ ॥ ६७ ॥

संसक्ते त्वव्यवहितं चपदान्तरमित्यपि ।

मिले हुएके नाम ३-संसक्त १ अव्यवहित २ अपदान्तर ३ ॥

—नेदिष्ठमन्तिकतमं—

अतिसमीपके नाम २-नेदिष्ठ १ अन्तिकतम २।

—स्याद्दूरं विप्रकृष्टकम् ॥ ६८ ॥

दूरके नाम २-दूर १ विप्रकृष्ट २ ॥ ६८ ॥

दवीयश्च दविष्ठं च सुदूरं-

अत्यन्त दूरके नाम २-दवीयस् १ दविष्ठ २ सुदूर ३ ॥

—दीर्घमायतम् ।

